No. ४-ग-१ ६२४३

Title प्रत्यक् तत्त्व प्रदीपिका

Author चित्सुख मुनिः

Extent १२५ पत्र Age सं. १८८२

Subject वेदान्तः

प्रत्यक्तत्व प्रदीपिका जो ठाकर स्टाईनके सूचीपत्र पर १६०५ नंबर पर जमाई
वह जीर्ण होगयी है इसलिये उसकीजगह यह पुस्तक नयी लिखाई जाकर दाखिल

श्रीरघुनाथ पुस्तकालय करायी गयी सं. २२ कार्तिक प्र. २

॥ अथ प्रत्यक्तत्त्वप्रदीपिका प्रथमोपरिच्छेदः प्रारम्भः ॥

पत्र संख्या १२४

प्र॰कृ॰ ॐ स्वस्ति श्रीगणेशाय नमः ॥ त्वं माम्यंतरगभूमिभावनिगदं व्याख्यानतद्वैभवो यः पंचा द्वीपि-
१ ननपांचजन्यवपुषा व्यादिष्टविश्वात्मनः प्रह्लादाभिहितार्थतत्सगुणमिलद्दंष्ट्रप्रमाणं
हरिः सो व्याद्घः शरदिंदुसुंदरतनुः सिंहादिचूडामणिः १ ज्योतिर्यद्वातितृणाम्नर्व्या
सशंकरेशाद्धितं ज्ञानोत्तमाख्यं तं वंदे सत्यानंदपयोदितम् २ विघ्नानि पातिव्रा
तध्वांतध्वंसप्रगल्भवाचालीं क्रियते चित्सुखमुनिना प्रत्यक्तत्त्वप्रदीपिकाम्
विदुषाम् ३ प्रमाणनखनिर्भिन्नमहामोहामरारये नमस्कुर्मो नृसिंहाय स्वप्रकाश
चिदात्मने ४ कोयं स्वप्रकाशशब्दार्थः किं स्वप्रकाशे प्रकाश्येति स्व
प्रकाशः स्वस्य स्वयमेव प्रकाश इति वा सजातीयप्रकाशाप्रकाश्यत्वं वा स्व
सत्तायां प्रकाशव्यतिरेकविरहित्वं वा स्वव्यवहारहेतुप्रकाशत्वं वा ज्ञान
विषयत्वं वा ज्ञातविषयत्वे सति अपरोक्षत्वं वा व्यवहारविषयत्वे सति

ज्ञानाविषयत्वंवा स्वप्रतिवद्धव्यवहारेसजातीयपरानपेक्षत्वंवा अवेद्यत्वेस
तिअपरोक्षव्यवहारविषयत्वंवा तद्योग्यत्वंवा ११ नाद्यः वेद्यस्यापि
ज्ञानस्य स्वप्रकाशत्वाभ्युपगमात् न द्वितीयः कर्मकर्तृभावविरोधे
नलक्षणस्यासंभवित्वात् न तृतीयः प्रदीपादेः सजातीयप्रकाशाप्र
काश्यस्यापिस्वयंप्रकाशत्वेनलक्षणस्यातिव्याप्तेः घटादेरपि सजातीय
प्रकाशाप्रकाश्यस्य स्वप्रकाशत्वप्रसंगाच्च नहि प्रदीपादौ ज्ञानेवा घ
टत्वादिजातिरस्ति येन घटादय्यु सजातीयप्रकाशाप्रकाश्याभवेयुः स
त्तया सजातीयत्वंतत्राप्यस्तीतिचेन्न विशेषणवैयर्थ्यात् सत्ताविर
हिणः प्रकाशस्यैवाभावात् प्रकाशाप्रकाश्यत्वमित्येतावतैव चरिता
र्थत्वात् न चतुर्थः सुखादावतिव्याप्तेः सुखादेरपिस्वसत्तायांप्रकाश

प्र॰कृ॰ व्यभिचारात् न पंचमः प्रदीपादावतिव्याप्तेः प्रदीपादेरपि स्वव्यवहारहेतुत्वात् प्रदीपि॰
२ प्रकाशत्वाच्च अयत्नान्व्यवहारहेतुप्रकाशत्वे तदपि न अनुव्यवसायेऽप
तिव्याप्तेः तस्य वेद्यत्वेपि व्यवसाययत्नान्व्यवहारहेतुप्रकाशत्वात् प्रदी
पज्ञानमिदमिति व्यवहारहेतौ प्रदीपप्रकाशेऽतिव्याप्तेश्च किंच व्यवहार
हेतुत्वं विशेषणमुपलक्षणं वा नाद्यः शुक्तिरजतादावव्याप्तेः नाद्विती
यः तत्रोपलक्षितस्य तस्यापि विशेषणत्वे प्रागुक्तदोषानुषंगात् स्वरूप
मात्रत्वे तु ज्ञानं प्रकाश इत्येव स्यात् तथा च लक्षणासिद्धिः नापि षष्ठः
स्वयंप्रकाशत्वसाधकानुमानागमादिज्ञानविषयत्वेन लक्षणस्यासंभवि
त्वात् तस्याप्यविषयत्वे कथाप्रवृत्त्यनुपपत्तेः नापि सप्तमः अविष
यत्वस्यैवासंभावितत्वेन निरस्तत्वात् विषयत्वशब्देन कर्मविवक्षायामुक्त

मतानुसारिणामात्मन्यतिव्याप्तेश्च तस्य शाब्दकतयाऽसिद्धस्याविषयत्वे
व्यपरोक्षतयानिरंगीकारात् नाप्यष्टमः प्राचीनदोषानुषंगात्
शुक्तिरजतादिसंसर्गेऽतिव्याप्तिर्वादिनामतिव्याप्तेश्च तस्य व्यवहारवि
षयत्वेऽपि तैरपरोक्षतयाऽविषयत्वानंगीकारात् नापि नवमः स्वप्रतिबद्धव्य
वहारसजातीयव्यवहारानुपेतत्वस्य प्रदीपादौ चक्षुरादौ चभावेनातिव्या
प्तेः स्वतया सजातीयत्वविवक्षायां तु व्यवहारस्य स्वतया सजाती
यादृष्टादिजन्यस्य तदपेक्षत्वेन लक्षणस्यासंभवित्वप्रसंगः ना
पि दशमः अवेद्यत्वेऽनुमानादिगोचरतयाऽकथ्यानवस्तारप्रसंगस्य
दर्शितत्वात् अपरोक्षव्यवहारविषयत्वमिति विशब्देन प्रत्यक्षतया
विषयत्वस्य कंठोक्तत्वात् तद्विपरीतावेद्यत्वाभिधाने मेमातः वंध्ये

प्र·कृ· ंत्रिवर्षा घाता स्वरूभृति प्रलयामो लेषव्याप्तेश्च तदा व्यवहारस्यैवाभावे र प्रदीपि·
३ नत्वाद्विषयत्वाभावात् नाप्येकादशः उक्तव्यवहारयोग्यताया ध
र्मित्वेष्वहेतुत्वादितामपासिद्धांतापातात् स्वरूपेन ज्ञानस्वभावस्यात्म
व्य नां वहारनिरूपणीयत्वात् सप्रतियोगिकत्वप्रसंगः तेष्वेन स्वयंप्रका
शत्वलक्षणं पर्यवसानं नापि प्रमाणाप्राप्त्या अनुभूतिरनुभूतिव्यवहा
रहेतुः प्रकाशः अनुभूतित्वात् यन्नैवं तन्नैवं यथा घट इत्यनुमानं प्रमा
णं तत्र चासिद्धविशेषणः पक्षः अनुभूतिव्यवहारस्य हेतुभूत आ
कोशः परेषामपि हि प्रसिद्धः नतानुभूतेस्वत्वस्वरूपत्व प्रतितोपपद्यते न
चानुव्यवसायज्ञानेसाध्यस्यासिद्धत्वात् तेलाघवासिद्धसाधनता नेत्स्वरू
पस्यैवासमतत्वेनतस्य धर्मिताग्रतानंगीकारादिति चेत् मैवं अनुभूतिव्यवहा

रस्यहेतुत्वम्अतः प्रकाशोयत्रसिद्धत्वहेतोरुक्तौकेवलव्यतिरेकित्वव्याकोपात्
व्यवृत्तौसपक्षाप्रवेशिनोऽसाधारणानैकान्तिकत्वापातात् वृत्तावपि
तागोसिद्धसाधनतापातः परिहरन्नाह नचत्वत्पक्षासिद्धत्वमात्रेण पर
सिद्धस्य वादि धर्मिणि सिद्धसाधनतया: परिहारः अन्यथाख्यात्यप्रकृत्यपप्ना
ख्यातिवादिभिः केनचिद्रजतनारजतत्वानुद्य पुरोवर्तिविषयत्वे साध
धितेवेदान्तिनाचानिर्वचनीयपुरोवर्तिरजतविषयत्वेन सिद्धसाध
नत्वेऽपि हिनेनास्माकं नासिद्धमिति वचनमात्रेणान्यथाख्यातिवादि
नस्मरितार्थी भवेयुः अन्यथानिर्वचनीयवादिनं प्रतिपक्षंप्रयोग
स्तत्पक्षसिद्धसाधनतापत्तेः नहिनुव्यवसायवाधितं प्रत्यक्षंप्रयंप्र
योगोनस्यात् तागोसिद्धसाधनत्वप्रसंगात् स्वपरप्रकाशवादिर

प्र० कृ०
४

तं प्रति चासिद्धसाधनत्वादप्रयोग इति परकीलाव एव स्यात् अथ विवादप प्रदीपि:
दपदेनानुव्यवसायस्य व्यवच्छेदयत्नास्य धर्मितागतेतिमतिः तथापि त
स्य साध्यविशेषणप्रसिद्धिस्थलत्वेनाभ्युपगमात् हेतोः केवलव्यतिरेकि
त्वाल्लाभस्तदवस्थः इतरेतरनंगीकारे च नाविशेषणाप्रसिद्ध्युपपत्तिः अथ
परं प्रत्येवतस्य प्रसिद्धिस्थलता नास्ति प्रति केवलव्यतिरेकिणः प्रयो
गायोगः किंच व्यवहारहेतुत्वस्य प्रकाशाविषयो भूतायां केवलव्यतिरे
त्वदलावात् स्वयंप्रकाशत्वेनाव्यवः व्यवहारहेतुत्वयोग्यतायाश्च स्वरू
पातिरिक्तायां स एव दोषः अथ परतः उपलाधितप्रकाशत्वमेव सा
ध्यम् तथाप्युपलाधितत्वस्य साध्यांशे लाभ स एव दोषः अनंतर्ली
वे च प्रकाशस्वरूपतायां एव साध्यत्वात् तस्याश्चान्यत्राप्रसिद्धत्वात्

नकेवलव्यतिरेकानुमानावकाशः एतेनानुभूतिरननुभाव्या अनुभूतित्वा
दित्यादिप्रयोगोपि परास्तः तत्राप्यप्रसिद्धविशेषणतायाद्दुःपरिहरत्वात्
ज्ञानवेद्यं वस्तुत्वात् घटवदिति प्रयोगसंभवाच्च न च हेत्वासिद्धिः सत्ताधि
करणत्वलक्षणवस्तुत्वस्यावधीरितकाल्पनिकोल्पितविशेषस्यानु
त्वात् भूतित्वादिवत्तत्र हि पपत्तेः ननु किमिदमसाध्यमानं वेद्यत्वं वास्तव
मुतावास्तवं आद्ये हि व्यवहारिकमपारमार्थिकसाधारणं आद्ये साध्यविकलः
निदर्शनीकृतस्य भुवि सिद्धसाधनत्वामिति चेन्न मैवं घटादेरिव व्यवहारिकप्र
माणसिद्धवेद्यतापादनेपि स्वप्रकाशत्वासिद्धेः किंच अनुभूतिपदं स्व
गोचरगोचरज्ञानाजन्यपदत्वात् कुंभपदवत् ननु किमनुभवगोचरस्फार
वेदनाविषयमात्रमुच्यते किंवावाच्यार्थः आद्यलक्षणावा नत्वावन्न

अ॰ कृ॰
५

यश्च द्वितीयोऽसिद्धसाधनतापत्तेः अभ्युपेयत्वेहि अनुभूतिशब्दवाच्यस्या अद्वीपि॰
न्तःकरणवृत्तिविशेषस्य स्वज्ञानस्वज्ञानगोचरता स्वतीयेस्मरख्यार्थवि
वक्षया प्रयुक्तगंगादिपदे व्यभिचार इति चेन्नैवं लक्षकपदं पक्षीकृत्य लक्ष
कपदत्वेन गंगादिलक्षकपदं वक्तृस्वज्ञानजन्यत्वानुमानात् किंच
अनुभूतिपदाभिधेयस्य स्वप्रकाशत्वमभिधीयते तद्बहिःकरणलक्ष
स्य तावदपसिद्धान्तापातात् नाद्वितीयः प्रतिवाद्यंप्रत्यक्ष
प्रसिद्धेः सकलधर्मातीतस्य द्वितीयस्यानुभूतिपदलक्ष्यस्य प
रैरनंगीकारात् नच स्वप्रकाशतायासाहित्यमाणेनैवधर्म्यं च स
तिवसाधकाभावादेव न तत्सिद्धिरिति विशेषोपातिवृदाता कृतयत्नः
पाशारज्ज्वादिस्थलप्रातीविस्तरेण अत्रोच्यते अपरोक्षव्यवहृतेयो

ग्यस्याधीपदस्य नः संभवे स्वप्रकाशस्य लक्षणासंभवः कुतः न तावत्स्व
यंप्रकाशे लक्षणासंभवः अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यतायाः स्व
लक्षणत्वात् नैवयोग्यतालक्षणधर्मांगीकारे अव्याप्तिर्मोक्षदशायां
दृत्तसंभवात् अपसिद्धान्तापत्तिश्चातिशंकनीयं योग्यत्वात्यंताभा
वानधिकरणत्वस्य तत्त्वात् रूपवत्वात्यन्ताभावानधिकरणस्य द्रव्यत
वत्तेन तत्राव्याप्तिर्नाप्यपसिद्धान्तः कल्पनिकधर्माणां संसारदशाया धः
मभ्युपगमात् अक्षमाभवतः केयं साधकत्वप्रकल्पते किंनपश्य
सि संसारं तत्त्वैवाज्ञानकल्पितमिति सुरेश्वराचार्यवचनात् १ आनं
दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा हि तेपि च पादिकाचार्यवच
नाच्च मोक्षदशायां च विवादितधर्माभावापि कदाचित्सत्त्वेन तदत्यं १

प्र॰कृ॰
६
तप्वा

6

ताभावानधिकरणत्वस्य गुणाश्रयो द्रव्यमितिवाक्ये सिद्धेः अपरोक्षव्यवहा
रयोग्यघटादावृत्तिव्याप्तिपरिहारार्थमवेद्यत्वे सतीति विशेषणं नचैता
वदस्त्वैकलक्षणमितिवाच्यं सतिधर्मादिष्वतिव्याप्तेः ननुतेषामप्या
गमवेद्यत्वात्तावेद्यत्वमितिचेन्न मैवं फलव्याप्यत्वलक्षणावेद्यत्वस्य
तत्राभावात् तत्रविशिष्टशब्दप्रमाणवलात्तदाकारधीवृत्तिः सम्भ
लासमात्रादेवतत्रव्यवहारयतिवेदवादिनां प्रक्रिया नच योगिप्रत्यक्षा
गम्यतयाऽपरोक्षत्वधर्मादीनां चोदनैकप्रमाणवेद्यत्वात्तेषां ने
चैतावतासर्वदर्शित्वाभावो योगिनां सर्वदर्शित्वशब्देन योग्यसर्व
द्रष्टृत्वस्यविवक्षितत्वात् यत्राप्यतिशयो दृष्टः सस्वार्थानतिलं
घनात् दूरसूक्ष्मादिदृष्टौस्यान्नरूपे श्रोत्रवृत्तिताइतिन्यायात् क्व

प्रदीपि॰

त्र धर्माद्यवच्छेद धर्म्यपरोक्षव्यवहारयोग्यत्वे सतीति विशेषणे न
त्वज्ञानांतःकरण नेत्र धर्मोष्ठादिषु शुक्तिरजतादिषु च लक्षणगति व्या
प्तिस्तदवस्था तेषामपि फलव्याप्यत्वाभावेनावेद्यत्वात् अहमज्ञ इ
त्याद्यपरोक्षव्यवहारयोग्यत्वाच्चेति चेत् सत्यं. अवेद्यत्वेपि तेषामपरो
क्षव्यवहारयोग्यतानतेषां अध्यस्ततयैव तेषामसिद्धेः नन्वेतेषाम
परोक्षामिति व्यवहारदर्शनान्नयोग्यत्वान्न कल्पनीयेति चेत् मैवं
रजताद्यव्यवहारायोग्येषु शुक्तिशकलादौ रजताद्यव्यवहारदर्शनात्
नन्वेवं सति अवेद्यत्वविशेषणस्य न व्यावर्त्यमस्ति त्वन्मते घटा
देरपि अध्यस्ततया अपरोक्षव्यवहारयोग्यत्वाभावात् मैव व्यवहा
रदशायां तेषां प्रत्यक्षप्रमाणविषयाणां अपरोक्षव्यवहारयोग्य

प्र॰ टी॰
७

7

तांगीकारात् तथाप्यवेद्यत्वे सत्यपरोक्षत्वमेवलक्षणमस्तु व्यभिचाराभावादिति चेत् प्रदीपि॰
न सत्यं अपरोक्षज्ञानविषयत्वेनैव घटादेः परोक्षत्वांगीकारात् दत्तापि तत्र व्या
त्याभासात् इति विभ्रमो माभूदिति तु व्यवहारेणैव भ्रान्तिवादिनामपि संप्रतिप
न्नेन तत्स्वरूपस्फुटीक्रियते इति न कश्चिद्दोषः कथं तर्हि अवेद्यस्य व्यवहारयोग्यत्वमि
ति चेत् किमिदमवेद्यत्वे व्यवहारविषयत्वं न स्यादित्यनिष्टप्रसंजनं उत तत्र व्यव
हारविषयत्वात् वेद्यत्वानुमानं नाद्यः आपाद्यापादकयोरुभयोरपि परेषा
मप्रसिद्धेः नेतरः तस्य प्रतिसाधननिरसनसमये निराकरिष्यमाणत्वात् तस्मा
दनाविलम्ब प्रकाशलक्षणं १ प्रमाणमपि अनुभूतिः स्वयंप्रकाशा अनुभूति
त्वात् यत्रैवं तत्रैवं यथा घट इत्यनुमानं न चाप्रसिद्धविशेषणत्वं यतः
सामान्यतोऽनुमानेन प्रसिद्धेऽपि विशेषणे कथं कथय पक्षोऽयमप्रसिद्धवि

शेषपूरणः १ तथाहि वेद्यत्वं किंचिन्निष्ठात्यन्ताभावप्रतियोगिधर्मत्वात्
घटोल्लावदिति सामान्यतो दृष्टानुमानेनानिर्धारितधर्मिविशेषवृति
त्वस्य वेद्यत्वधर्मस्य प्रसिद्धत्वात् केवलव्यतिरेकिणः चोभयवादिसं
प्रतिपन्नापरोक्षव्यवहारयोग्यानुभूतिविशेषाविलक्षणताया एवसम्भ
मारणसात् नाप्रसिद्धविशेषणता यद्यपि पक्षे असम्भाहित प्रसाधि
तत्वाविरुद्धमवयोग्यमिति सामान्यव्याप्तिः इत्याद्युक्तिरनुलाव्यालव
तिनवाति वादिविप्रतिपत्ते सपक्षे सत्त्वसंभावनयाति असमीहित प्र
द्विपर्यय सत्तोस्त [illegible] स्य सामान्यतो मानयोग्यत्वाधिगमात् विशेषधर्मा
णापेक्षायां व्यतिरेकिण उपन्यासात् नाप्रसिद्धविशेषणता अन्य
थाकथमपि घटादीनामप्रद्रव्यव्यतिरिक्तद्रव्याश्रितत्वेनेत्यायिकादयोपि

प्र॰कृ॰
८

8

साधयेयुः अष्टद्रव्यव्यतिरिक्तद्रव्यस्य प्रसिद्धावप्रसिद्धविशेषणता प्रसिद्धौ
च हेतोस्तत्र द्रव्यान्वयव्यतिरेकितया केवलव्यतिरेकित्वासंभवात् अप्रसिद्धौ
चाश्रयासिद्ध्या साधारण्यानैकान्तिकतापत्तेः नचैवं सति अप्रसिद्धविशेषणतायामप्यहे
षणतापत्तिः उक्तसामान्यतोदृष्टानुमानगोचरत्वासंभवे शेषवद्विषयेणाहि
स्विताभूरित्यादौ तस्याः सावकाशत्वात् अपवादायघटेन ह्युदात्तत्वसामान्यविष
त्वात् तदधिकरणान्यः पदार्थत्वात् पटवदित्यादिमहाविद्याप्रयोगेष्वप्येवं पक्षप्र
सिद्धिरप्यूहनीया नाप्रसिद्धविशेषणतापि अन्वितेः प्रसिद्धत्वात् अत एव ४
नाश्रयासिद्धिरपि हेतोः नापि स्वरूपासिद्धिः कल्पितव्यक्तिभेदे तद्वस
वंसस्य सामान्यस्यैव उभयत्र सामान्यस्याभ्युपगमे दृष्टान्ताविरोधात् मि
कल्पितस्यापि प्रतिवादिकस्य साधकत्वसंभवात् न च प्रतिवाद्यसिद्धि

ना

तै घ्यनुभूतित्वसामान्यस्याभ्युपगमात् नचकल्पिताकल्पितत्वदे धर्म्याद्वेतोरन्य
तरासिद्धिराशंकनीया अवधीरितकल्पिताकल्पितत्वविशेषस्यानुभूतित्वमात्रस्योभ
यवादिसिद्धत्वात् अन्यथाधूमवत्त्वादौ वर्णितदेशावच्छिन्नत्वादिविकल्पे
नासिध्याद्युद्धारपरिहरत्वात् नचव्याप्यत्वासिद्धिः सोपाधिकस्याव्याप्यत्वात् के
वलव्यतिरेकिण्युपाधेरसंभवात् उपाधिर्हि साध्यव्यापकत्वे सति साधनाव्या
पकः सचान्वयव्यतिरेकीकार्य्यधर्मः सपक्षकेवलव्यतिरेकिणि पक्षव्यतिरि
क्तभूमौ साध्येनान्वयी स्यात् नचपक्षे साध्येतरन्याय्यः तत्र साध्यस्याप्यसंदि
ग्धत्वात् निश्चये चासिद्धत्वेन सपक्षोहि न स्यादिति किमुपाधिः करिष्यति पक्षेचोपाधे
र्वृत्तौ साधनव्यापकता च दुर्वारा नचसाध्यसद्भावे मानं उपाधिः साध्याभा
वे काशीति उपाधिर्भविष्यतीति वाच्यं तदा धियत्रोपाधिरस्ति तत्र साध्यं नास्ती

प्र.कु. त्रिसाध्याभावस्यागमकत्वेकृतोपाधिरेष्टव्यः अन्यथोपाधिसहावेपिसाध्या प्रदीपि
९ भावेव्यापकतयानवर्त्तेनैवेउपाधिसहावेसाध्यंस्यात् तेद्यनपत्ते नत्रो
पाधिसहावेतस्यसाधनव्यापकत्वप्रसंगात् तस्मादत्यंत्रोपाधित्वेसा
ध्यस्यसत्त्वस्यादितिवाच्यं तथाचकेवलव्यतिरेकित्वभंगप्रसंगः अत
एवानुभूतिर्विद्यावस्तुत्वाद्घटवदितिकेवलान्वयिनानुमानेनाहिस्वयंप्रकाशत्व
व्यतिरेकोवक्तव्यः तत्रनतोपाधिःसंभवति साधनाव्यापकत्वस्यवक्तुमशक्
२ यत्वात् नदेवंतासिद्धोहेतुः नापिविरुद्धः वुधेषुविपतेषुअनुभावित्वहे
तोरदृष्टेः नाप्यनैकांतिकः विपत्ताभावत्वेरव नाप्यसाधारणः सपक्ष
भावात् विपक्षेवाधकतर्काभावात्संदिग्धानैकांतिकत्वमितिचेत् मैवं अनु
भूतेरनुभाव्यत्वेअनवस्थापातात् तथवाच्यं अववयवेद्यत्वाभावान्न

न वस्तु व्यवहारस्य तत्स्वरूपसत्तामात्रेणोपपत्तेरिति तद्विषयप्रमाणानुदयेऽपि तत्स
त्तायाश्चापि त्रातिप्रसंगात् मैवं व्यवहारस्यानुपपत्तिसिद्धेः अथ यदाकदाचित्तत्सं
ज्ञाजिज्ञासोदये व्यवहारादिनामैव चिह्नलिंगेन सापि प्रमीयत इति मत्वा तत्र घट इति
घटमनुलक्षामीति चानुभूतिव्याप्तिरिक्तायास्तु तदनुभूतिपरंपरावगाहिकाय
याः कस्याश्चिदनुभूतेरनुभवगोचरत्वात् मैवं इत्थं तदनुभूतेस्तत्सत्ताभ्युपग
त= मे प्रमेयसत्तायाअपि त्याभ्युपगमोपपत्तौ प्रमाणगवेषणावैयर्थ्यापा
तात् न चापि च प्रमाणगवेषणया पूर्वोक्तानवस्था तदवस्थैव स्यात् अ
पसारस्वाविषयप्रमाणमंतरेण स्वभावभेदापदवस्त्वाविषयभेदव्यवहारजन
यत् जनयत्यपि मैव नाहिंत्यास्वयग्रहणमितिव्यर्थानुभूतिपरंपराभ्युपग
तिः तदेवमनुभूतेरनुभाव्यत्वेऽनुभूतिस्वरूपासिद्धिप्रसंगस्यैवापत्तेर्वा

प्र॰ स्फु॰ १०

10

नु

धकत्तर्कत्वात्तु संदिग्धानैकांतिकत्ता किंचानुभूतिरर्थप्रकाशनसमये यदिन प्रदीपि॰
प्रकाशेत तस्याः सत्यनंतरक्षणे जिज्ञासोस्तत्र संदेहो विपर्ययो वा विपरीतप्रमा को
दियात् नच कश्चिद्घटमद्राक्षीन्नो वाभवामिति पृष्टोनंतरक्षणे संदिग्धो वि
पर्यस्यति संविद्भाव वा प्रामिणोति किंतु निश्चितोस्त्येव इदमहमद्राक्षमिति
तेन प्रकाशमानैवानुभूतिरर्थव्यवहारजनयतीति युक्तम् नच स्वरूपा
दिवदन्याधीनप्रकाशत्वेपि संप्रयोगाद्यविषयत्वोपपत्ति मातिधार्मिता
न घटवदवश्यवेद्यत्वेन वस्त्वादीत्स्यात् किंच येन मनःसंयोगेन घटानुभू
तिर्जनिता तेनैवानुव्यवसायस्यापि जन्म उत्तसयोगान्तरेण नाद्यः अ
नुव्यवसायप्रतिकर्मकारकत्तयाजनकस्य व्यवसायस्य तेज्ञत्वानुव्य
वसायस्य वयोगपद्यायोगात् कारणस्य प्रत्ययपर्यायेसामर्थ्यानगीका

रात्र यतेसमवायिकारणभेद एव ज्ञानभेदहेतुरभ्युपेयते अन्यथापेक्ष
रणि यांतरासंभवेन युगपदेव घटपटकुंभवस्मरणाद्योरनुभवो नुरस्य चक्षुर्विष
यस्येन्द्रियान्तरप्रसंगात् अक्रमात्कारणात्कार्यभेदक्रमायोगात् बाह्य
सामग्र्येवहेतुरक्रमभेदेन कार्यक्रमाभ्युपगमे युगपदेव संघयुक्ते घट
पटादिषु युगपदेवानेकज्ञानजन्मप्रसंगात् नद्वितीयः घटज्ञानोदय
समयेमनसि क्रियातततोविभागस्ततः पूर्वसंयोगविनाशस्ततउत्तरसंयो
गोत्पत्तिस्ततो ज्ञानान्तरमित्यनेकक्षणविलंबेनोत्पद्यमानस्य ज्ञानस्य
परोक्षतयापूर्वज्ञानग्राहकत्वानुपपत्तेः किंच चक्षुरादिवत्प्रकाशमान
स्यैव ज्ञानस्य स्वव्यतिरिक्तज्ञानजन्मनेनार्थव्यवहारहेतुत्वाभावात् जडा
नांच परस्परं वा प्रकाशमानत्वायोगात् ज्ञानमपि प्रकाशते चेत् किमपि न

न

प्र·कृ· प्रकाशेतेति जगदांध्यप्रसंगः इत्यादिविपक्षबाधकस्तर्कोऽवसेयः ननु घटज्ञानवानहमस्मि प्रदीपि·
१९ ज्ञातो घट इति प्रत्ययेनैवानुभूतेर्वेद्यत्वप्रतीतेः कालात्ययापदिष्टतेति चेन्न न वेद्य
त्वव्यतिरेकेण तस्याः स्वतःस्फुरणतापत्त्या तद्व्यवहारोपपत्तेः किंच विदितो घट
इत्यत्रानुव्यवसायेन घटस्यैव विदितत्वमवसीयते न तेन ज्ञानवित्तेः विदितत्वस्य ज्ञान
विशेषणत्वात् अपि चानुभूतेरन्यप्रत्यक्षतायामपि तत्र तस्य तदेकैकत्वदर्शना
व्यात्तस्याप्रत्यक्षीकरणात् न प्रत्यक्षज्ञानविरुद्धता अन्यथानुव्यवसायेन व्य
वसायस्य स्वविशेषितवेद्यत्वग्रहणे विशेषणतया तस्यापि स्वविद्यत्वापत्त्या
त्र सोऽगृहीतमत्वानुपातिप्रसंगः न च वेद्यत्वापादकवस्तुत्वाद्यनुमानविरोधः
व्याप्तिग्रहणासिद्धेः तथाहि वस्तुत्वाद्वेद्यत्वसा[illegible]यत्तायत्र वस्तुत्वं तत्र वेद्य ५
इति व्याप्तिरभ्युपेया तथासत्यस्याव्याप्तेर्ग्राहिका सा संविद्व्याप्तिग्रहणसमये स्फुर

त्तिनवा आद्यस्यैवस्फुरणेसौगतमतान्नमतस्वप्रकाशत्वापत्तिः तत्स्फुर
णस्य स्वहेतुतायामत्र पतंजलीकारेवेदांतसिद्धांतालिमतस्वयंप्रकाशत्वंत्वपा
स्युपगतंस्यात् द्वितीयेतुसंविल्लक्षणवस्तोविशेषणस्यास्फुरणादेवसर्वो
याप्ति पसंहारवत्तीरुवास्तामियात् तत्रकुतोनुमानप्रसरःकुतस्तरांच प्रकृतहेतोःस
प्रतिसाधनता अपिच महत्वाद्यातितायाव्यभिचारात् नैयायकाद्यभिमतवेद्य
त्वस्यापिधर्मितयात्यंताभावप्रतियोगित्वात् अबाधस्यापिकस्यचित्संभवेकेवल न
त्वाद्देः केवलान्वयित्वेनाभिमतस्यापिहेतोः संभावितविपक्षतया विपक्षबाधकत
र्कमन्तरेणाप्रयोजकत्वात् नसत्वभूतेरवेद्यत्वेवस्तुत्वानुपपत्तिः स्वतःसिद्ध
तायामपितदुपपत्तेः लब्धत्वन्यायविषयत्व हेतुमरपिपक्ष्याकृत्तीयं नच
X पदत्वेनलब्धविषयज्ञाननन्यत्वमनुमेयं हेतोरसिद्धत्वात् नसत्वभूतिपदस्यानुभूति
लक्षक कृ

लक्षयतीतित्वयाभिमतं तद्वाचकत्वेनस्वीकारात् किंचलक्ष्यस्तान शब्देनलक्ष्य
कर्म्मकंस्फुरणम् किंच तद्विषयमत्रस्फुरणमात्रं किंवातद्विषयान्तःकरणवृ
त्तिर्विवक्ष्यते नाद्यः अतीतानागतलक्षकपदेष्वव्यभिचारात् नेतरासिद्धसाधन
त्वात् अस्तिहितत्स्वभावस्यापिस्फुरणस्यव्यवहारजनकत्वेनतद्विषयत्वं अ
स्तिचस्फुरणमात्रमनुभूतेःस्फुरणरूपत्वात् तदाकारतायाश्चान्तःस्वीकाराच्च अ
नुभूतिपदवाच्यस्यलक्ष्यस्यवास्वप्रकाशत्वमित्यापिविकल्पोनुपपन्नः उभयवा
दिसंप्रतिपन्नस्फुरणमात्रस्यस्वप्रकाशत्वप्रतिपादनात् अन्यथावेद्यत्वसाध
नेपित्वयापिविकल्पोनुपपन्नः उभयवादिसंप्रतिपन्नवास्यविकल्पस्यदुःपरिहरत्वा
त् नन्वेवमपिघटःस्वप्रकाशोघटत्वात् यत्रैवंतत्रैवंयथापटइत्याभाससमा
नयोगक्षेमताहेत्वोरितिचेत् मैवं पृथुबुध्नोदराकारस्यघटशब्दवाच्यस्यस्य

धर्मरूपादिमत्त्वस्य तु: स्पर्शनप्रमाणासिद्धत्वेन संमतस्य स्वप्रकाशत्वसाधने प्रत्य
क्षाविरोधात्‌ अन्तद्विषयस्य चाप्रसिद्धत्वेन धर्म्यसिद्धेः नचात्राप्यवेद्यस्यानु
भूतित्वमप्रसिद्धमिति वाच्यं तथासति तस्यावेद्यत्वावेद्यत्वयोर्वादिनां विप्रति
पत्त्यभावप्रसंगात्‌ नचैवमुलपतः पाथारज्ञ: अनुभूतेः प्रमाणजन्यस्फुरणा
श्रयतया स्फुरणकर्मतया वा घटादिवद्विषयभावाभावेपि प्रमाणजनितावृति
कारणवृत्तिव्याप्यत्वेन विषयतायाः कारेपि स्वप्रकाशता व्याघातात्‌ उक्तवृत्तिव्याप्यत्वेपि
स्फुरणाश्रयत्वाभावादसाधनेन प्रामाणिकत्वापि केवलव्यतिरेकाभावात्‌ अती २
तानागतयोः स्फुरणविरहिणि कवृत्तिव्याप्ययोर्भावे प्रामाणिकत्वाभ्युपगमा
त्‌ चेष्टादिलिंगकानुमानविषयस्यापि परज्ञानस्य स्वाश्रयं च विषयं वा परोक्षव्य
वहारजननेऽज्ञानान्तरानिरपेक्षतया स्वप्रकाशतापत्तेश्च किंच त्वज्ञानं तत्त्वापरोक्ष
त्वा

प्र॰कु॰
२२

13

व्यवहारयोग्यत्वे सति वेद्यं न भवति ज्ञानत्वात् इत्यस्मदीयज्ञानवत् न च तदसम प्रदीपि॰॰
वेतत्वमन्यसमवेतत्वं वोपाधिः साध्याव्याप्तेः त्वदीयधर्मधर्म्यादिषु त्व
त्समवेते [illegible]ध्यसमवेते षु च परमाण्वादिष्वसाध्यस्य सद्भावेनोपाधेरभा
वात् न च ममापरोक्षव्यवहारयोग्यत्वमुपाधिः ममापरोक्षव्यवहारयो
ग्यत्वादिदं ममापरोक्षव्यवहारयोग्यत्वे सत्यवेद्यं न भवति घटवदिति व्यति
रेकेऽज्ञानेतरत्वस्यैवोपाधित्वात् विवादपदानि ज्ञानानि घटज्ञानान्यत्वे
सतीव यत्तानाधिकरणानि ज्ञानत्वात् घटज्ञानवत् न च घटज्ञानत्वमुपाधि
शरीरिजन्यत्वोपाध्यावद्वच्यापिविशेषणत्वात् तस्मान्निगलितसकलक
लंकमनुभूतेः स्वप्रकाशत्वानुमानमिति सिद्धं एतेनैवात्मनोपि स्वप्रकाशत्वं व्याख्यातं नात्र
तत्राप्याहि चिद्रूपत्वादकर्मत्वात् स्वयंज्योतिरिति श्रुतेः आत्मनः स्वप्रका

ज्ञातं कोतिविकारयितृ ह्यात्मा: आत्मा संविद्रूपः संवित्कर्मतामंतरेण परोक्षत्वात्सं-
वेदनवदिति प्राभाकरास्त्वनुमानात् घटतज्ज्ञानयोः संबंधः आत्मनिष्ठः
ज्ञाननिष्ठत्वात् यद्विषयत्ववदिति नैयायिकादीनां त्वनुमानादात्मनश्चिद्रू-
पत्वसिद्धिः विपक्षे चात्मनाऽसंशयाविपर्यासगोचरत्वापत्तिर्बाधिका न ह्यात्म-
न्यहमस्मि नवेति कश्चित्संदिग्धे नवाहमिति वा विपर्यस्यति नचैतत्स्वप्रकाश-
ज्ञानरूपतामंतरेणावकल्पते नचांतरेणापि ज्ञानरूपतां दुःखादिवेदनवदु-
पपद्यत इति शंकनीयं नैषां स्वसत्तायां ज्ञानाव्यभिचारात्तदुपपत्तेः नचा-
त्मन्येवमभ्युपगम्यमाने स्तंभस्याभावप्रसंगात् नच ज्ञानात्मनोः संबंधः
अनात्मवृत्तिज्ञानवृत्तित्वात्सत्तावदिति शंकनीयं ज्ञानमेवात्मेत्यभ्यु-
पगच्छतां ज्ञानात्मनोः संबंधस्यैवाभावादाश्रयासिद्धिः नहि द्रष्टुर्दृष्टेर्विपरिलोपो

प्र॰ कृ॰ विघ्नत्रशति दृष्टहस्त्योः संबंधः स्यातित एवाधिगतत्वं इतिमानमनोहरकाभः प्रति ष्ठेपदि प्रश्नपि॰
१४ त्तिचेन्न मेवं स्यात्तेर्लोकप्रसिद्ध संबंधात्तुवाद्न दृष्टेविनाश्यत्वाभावस्मात्प्रति
पादनपरत्वात् म्रप्राप्त्योहि शास्त्रम पर्थवदितिन्यायात् मुख्यार्थेहत्त्वस्य
त्तिविरोधात् राहोश्शिर वड्डपचारेणापि संबंधस्यात्ते रनुपपत्तेश्च नचानयो
लुल्यवलत्वया विपर्ययः नपरत्वात्त स्य त्वाविशेषोपपत्ते उपक्रमोपसंहा
रादिषड्विधतात्पर्यलिंगोपेत्त्वं स्यात्ते लोकप्रवाहपादोपजीवित्वेसव कार्यं
घस्यात्ति नवाधेन देवदत्तस्यगंतुरित्तिवदृष्टहस्त्योरित्ति दृष्टत्वपायाहस्तइति तद्
णोवाधोदृष्टान्तस्यविपरीतोपोनास्त्तीति सामानाधिकरण्येन षष्ठ्या संबंध
संभवे वैयधिकरण्यपरत्वकल्पनायोगात् नदृष्टे स्यात्परपक्षेपितत्सामानाधिकरण्यं इ-
त्याधिकरण्येष्यतः कारणपदेशाम त्वपायाहस्तयोर्दृष्टेतिवापरिणामितौत्त:

कारणस्य द्रष्टुः साक्षिभूतायाः दृष्टेस्तस्या विपरिलोपो वास्तीति वा अ
पेक्ष्य अकल्पनानुरूपसंभवति सर्वदृष्टगुणागुणभावेन सर्वदृष्टकल्पना अविदित
मीमांसा कृतेति स्येव परं प्रमाणतो किंच जीवेश्वरयोर्भेदमभ्युपगच्छताम
नित्यदृष्टिसंबंधः कस्येत्यत्र इति विविच्यतां नतावज्जीवस्य तस्यानित्य
त्वानभ्युपगमात् नापीश्वरस्य मैत्रेयीब्राह्मणे नवा अरे पत्युः कामाय पतिः
प्रियो भवति इत्यादिना पतिजायादिप्रियसंबंधितजीवस्य पंचात्तस्येव
चैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यत्र वस्तु
तः प्रतिपाद्यमानत्वात् विनाशमार्धाकोशाविनाशी वा अरे अयमात्मा अनुच्छि
त्तिधर्मा मात्रासंसर्गस्त्वस्य भवति यत्र द्वैतं न पश्यति पश्य चैतद् दृष्टं यतः पर
पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते इत्यविनाशित्वोपपादनात्

प्र॰ कृ॰ ज्योतिर्ब्राह्मणेऽवजागरायवस्थोपन्यासपुरःसरं अथयत्रसुप्तोनकंचनका प्रदीपि॰
१५ मंकामयतेनकंचनस्वप्नंपश्यतीतिश्रुतिसंप्रसादावस्थामभिधायेयं हेतत्राप
प्युपलभ्यत्वे तत्रापश्यतीतिनहि द्रष्टुर्दृष्टेर्विपरिलोपोविद्यतइति विशेष
विज्ञानाभावेपिस्वरूपविज्ञानस्यनित्यत्वप्रतिपादनात् ईश्वरपदेचविशे
षविज्ञानाभावस्यवक्तुमयुक्तत्वात् तस्यसर्वदासर्वज्ञत्वात् सुषुप्त्या
द्यवस्थाभावाच्च तस्मात्ज्ञानात्मनोःसंबंधोनात्मानित्यत्वमनुमान॰
मा श्रयासिद्धमितिसिद्धाय गुणत्वादनित्यत्वात् ज्ञानमात्मा न भवति
रूपादिवदितिपक्षपातत्सर्वमन्यत्रराशीकृत्यायापोस्यग्रपघुटन्नेज्ञानयोः
संबंधःरूपज्ञाननिष्ठः ज्ञाननिष्ठत्वात्सत्त्वावाचपदेचजानामीतिप्रत्ययस्य
निरालंबनत्वप्रसंगोवाधकइतिचेत् मैवं रूपज्ञानयोःसंबंधोद्रव्यनिष्ठो

ज्ञानानिष्ठत्वासंतावदिति प्रतियोगिसंभवात् जानामीति चानुभवस्या
न्तःकरणवृत्त्याश्रयप्रमातृविषयतयाप्युपपत्तेः विज्ञानमानंदं ब्रह्म
प्रज्ञानं ब्रह्म ज्ञानघन एवेत्यादिश्रुतिभ्यश्चात्मनो ज्ञानरूपत्वसिद्धिः न
चाधिकरणपरतया ज्ञानशब्दो योज्यः श्रुतिप्रतीतिविरोधात् तस्मा
त्सा धर्मोऽपि रूपत्वादिति कर्मत्वाद्यात्मनः स्वप्रकाशत्वं वेद्यत्वस्वा
श्रयज्ञानविषयतया कर्मकर्तृभावविरोधप्रसंगात् न च सुखमहं वि
शिदृश्याहं सुखीत्यादिज्ञानकर्मत्वं केवलस्य चकास्ति त्वमित्याकारभेदादवि
रोधो गमनादिक्रियायामपि केवलस्य कर्तृत्वं गमनविशिष्टाकारेण च कर्म
त्वामित्याकारभेदेनाविरोधात् कर्मकर्तृभावविरोधस्य सर्वत्राच्छेदप्रसंगात्
न चापि तात्मनः स्वप्रकाशत्वं तदर्थसंवेदनाश्रयतयापि स्फुरणोपपत्तेः

प्र. क्रं.
१६
८
16

नचास्य क्रियाफलभाजापि कर्तृत्वं परस्य समवेतत्क्रियाफलशालित्वाभावात् तेनात्मा प्र.वि.
नस्य प्रत्यक्षोपि समान जानातेः सदा सकर्मकतया कर्मणो व्याप्यस्य तन्निवृत्तौ निव
र्तिरिति चेत् मैवं संविद्व्यतिरिक्तस्य सांविकमेव नैवापरोक्षत्वानियमात् तत्त्वतः क
र्मत्वाभावेत्तनुपपत्तेः संवेदितासंविदो भयत्वयाप्यपरोक्षतानुभवात् किं परोक्ष
त्वात्संवेद्यत्ववादितिनच विषयत्वेवा घकत्वे कोभावः स्वसत्तायाः प्रकाशव्याभिचा
रवतः प्रकाशान्तराधीनत्व्यवहारवत्त्वेके चित् शय्यादिगोचरत्वप्रसंगस्येव
बाधकत्वात् आत्मनो घटादिज्ञानिभास्समानत्वांगीकाराच्च घटादिवदेव वा
नुपत्वमपि प्रसज्येत् तेज्ञानितेरज्ञातेनासमानतायाः एव तत्त्वात् नीरूप
स्य पूर्वस्य चाक्षुषत्वायोगात् आत्मनश्चाक्षुषत्वे नप्रकाशानेके
पि पूर्वात्वा प्रकाशावादितिप्रातिप्रयोगसंभवाच्च अशायपुरुषः स्वपर्ज्या

तिरितिश्रुतेश्चात्मास्वप्रकाशः ननुस्वप्नावस्थामधिकृत्यैवश्रूयते यत्त
त्रत्रमनसोऽपरमात्मस्वयंज्योतिस्त्वं नचमनसोगजाद्याकारपरिण
तस्यावभासकमस्तियेवावच्छेदनात्करणांतराभावाद्वात्मैवस्वयंज्योतिः १
स्यादितिशंकनीयं मनसश्चक्षुरादिवदिंद्रियत्वेनप्रत्यक्षत्वानुपपत्तेः त
स्मात्मनःसंयोगजन्यज्ञानाधारत्वेनस्वयंप्रकाशत्वाच्च आत्मैवज्योतिरि
त्यभिधीयते ज्योतिःसाधनत्वाद्वा वाचैवायंज्योतिरास्तेत्यत्रप्रकरणप
ठितवागग्न्यादिवत् नचात्मास्वयंज्योतिरिति द्रव्यस्यगुणत्वानुपपत्तिरि
तिचेन्न मैवं यतः संवेद्यस्याश्रयत्वेनविज्ञानासमवायित्वः इंद्रियत्वाऽ
घ्यो वि[illegible]तोवमनः प्रत्यक्षमात्मवत् मनःप्रत्यक्षज्ञानासमवायिकारणा
धारत्वादात्मवदित्यनुमानान्मनसोऽपिप्रत्यक्षत्वोपपत्तेः नचप्रत्यक्ष

ग्र॰स॰ त्वेसतिहींद्रियत्वव्याकोपः तस्य सा विवेचस्याप्यैंद्रियकज्ञानाविषयत्वेनेंद्रि प्रदीपि॰
१२ यत्वाव्याकोपात् तस्मान्निरस्तं समस्तं कलंकावकाशमात्मनः स्वप्रका
शत्वं तच्चात्मरूपमविद्यापरिकल्पितप्रपंचावभासकत्वादविद्यातमसो निव
त्वा र्त्तकं ब्रह्मज्योतिःशब्दाभिधेयं यच्चाभावरूपं वैशादितमो निवर्त्तते तेजः
गद्यवभासकमादित्यादिज्योतिरिति सिद्धं १ नैतुक्तमोनभावरूपं वैश्ये भा
वेनंत्वभावात् त्राद्रिष्टापिव्यादिद्रव्याणामन्यतमद्रव्यत्वासंभवात् ताय
क्षितिसलिलात्मत्वं चतुर्दशगुणाभृतेजसि एकादशगुणमारिध्वानि
नवगुणमनसि वाष्टगुणनभसि षड्गुणदिक्कालयोः पंचगुणपारविनाशि
तोरन्तरभावात् अंतर्भावेवा तद्वद्गुणवत्वप्रसंगात् आत्मादावंतर्भा
वेनित्यत्वापत्तेर्ज्ञानापिद्वितीयः निर्गुणस्य द्रव्यत्वानुपपत्तौ द्रव्यात्मत्व

स्पर्शवत्त्वस्यानुपपत्तेः नीलोत्पलदलप्रभामिव दृश्योपलभ्यमानं तमः कथं
निर्गुणमिति चेन्न नीलरूपस्य गन्धाद्येकार्थसमवायिनस्तद्द्रव्यस्य त
दभावेभावायोगात् नापि चतुर्द्रव्यान्तर्भावेन तावन्निरवयवत्वे नित्यत्वेनालो
कानिवर्त्यत्वापत्तेः सावयवत्वे च तदारम्भकाणां स्पर्शवत्त्वे तस्मिन्नपि स्पर्शो
पलम्भप्रसंगात् अस्पर्शवत्त्वे च तेषामतो वद्द्रव्यारम्भकत्वायोगात् ना
पि गुणः रूपात्मकविशेषपृथिव्यादित्रितयगुणत्वे च तत्सहचारिणां गुणां
न्तराणामप्युपलब्धिप्रसंगात् नापि नतोन्नतत्वतो गुणः तयो रूपत्वात्
नापि दिक्कालमनसां एतेषां विशेषगुणरहितत्वात् नाप्यात्मनस्तस्य
बाह्येन्द्रियप्रत्यक्षगुणानधिकरणत्वात् नापि कर्म संयोगविभागयोर
कारणत्वात् नापि सामान्यविशेषसमवायाः तेषां व्यक्त्याश्रयसं

प्र०कृ० वंधिनांउपलब्धिप्रसंगेपि अनुपलंभनियमात् नहि सामान्यस्यैव व्यक्तिविशेष प्रदीपि·
१८ स्यामिव चाक्षुषः समवायस्यैव संवंधी तमसः कश्चिदुपलभ्यते नचास्य
तमस उपलंभसंभवः कडुपलंभकाभावात् नवलोचनमुपलंभकं त
18 द्व्यापारे तदनुपलंभापत्तात् आलि चानिमीलितनयनस्यापि तमः प
श्यामीत्यभिमानः अपि चारूपत्वे रूपवत्त्वे वालोकाजन्यचक्षुर्जन्यसा
क्षात्कारविषयत्वं नस्यात् आलोकसहकृतस्यैव चक्षुषस्तत्र सामर्थ्यात्
त् नचापि मनस्त उपलंभकं वाह्येंद्रियानिरपेक्षस्य तस्य वहिरप्रवृत्तेः तस्मा
त् यद्यप्यपि भावेष्वनन्तर्भावादभावे चोपलंभकाभावात् तेनतावत्तमःशास्त्री
अत्रोच्यते तमालश्यामलज्ञाने निर्वाधे जायमाने स्फुटो द्रव्यान्तरं तमः
कस्मादकस्मादपलप्यते १ आकाशे हितिमसंतमालतमालश्यामलमिति प्रती

त्रिधर्मः

त्ति नच प्रतीतावेवाधंप्रती[illegible] तद्व्यवहारस्य तत्प्रतीतिमंतरेणानुपपत्तेः नचायमौपचारिक आलोकाभावे आंतत्याभावेपदादौ नीलव्यवहार इवेति युक्तं मुख्ये बाधकाभावात् रूपत्वे रूपवत्वे वा आलोकानपेक्षचक्षुर्जन्य ज्ञानविषयत्वासंभवो बाधक इति चेन्न मैवं आलोकविरोधिनस्तमस आलोकभावव्यंजनीयतया तन्निरपेक्षचक्षुर्विषयत्वोपपत्तेः सामग्र्यास्य कार्यगम्यत्वात् नचैवमालोकाभावस्यापि भूपदेशाभावेन घटाभाववदालोकनिरपेक्षचक्षुर्विषयत्वं न स्यात् बाधितत्वात् तदपेक्षत्वं उपकल्प्यापि समानं अन्यथाभिनिवेशित्वात् नच तिमिराविन्न नयनस्यालोचनस्य व्यापाराभावे पितमस उपलंभादचाक्षुषत्वं तत्रापि पक्षपरलोकवर्तितमसश्च चक्षुर्व्यापाराद्धेवोपलब्धेः पिहितकर्णपुटस्य श्रोत्रव्यापा

प्र. कृ.
१९
19

रादेवांतरशब्दोपलब्धिवत् यत्तु गंधाभावेनात आम्रं नीपरूपमपि न स्यादिति तत्र प्रदीपि·
पिना अनुद्भूताशीतस्पर्शस्येव पृथिव्यां गंधाभिव्यञ्जकस्य तद्भावेऽपि प्रकृति
प्रतीत्येवांगीकारवदिहापि प्रतीतेरेव नीलरूप- स्यगंधाभावेऽप्युपेयत्वा
त् अपाकजस्येवानुद्भूताशीतस्पर्शस्य गंधादिनाव्याप्तिस्तथेहापि पाक
जस्येव कालिमगुणस्य गंधादिनाव्याप्तिरिति तुल्यो सद्भावग्राहिणः प्रत्य
क्षस्योभयत्र समानत्वात् न च स्पर्शाभावात्तमसो रूपवत्त्वाभावः रूप
ग्राहकप्रत्यक्षाविरोधेऽनुमानस्य कालात्ययापदिष्टत्वात् तदभावानुसामानुदया
त् अन्यथा रूपाभावेन पवनेऽपि स्पर्शाभावेऽनुमानस्य दुर्निवारत्वात् अन्य / उं:
थे रूपवतामेव स्पर्शवत्त्वनियमात् न चास्पर्शवत्त्वादेव तमः परमाणूनां
मतोवस्त्वारंभकत्वमनुमानुपपन्नम् तत्रैवैयर्थ्यस्योपाधेः सद्भावात् ते

हिश्शरीरत्वंतथाविषयत्वमिंद्रियत्वंचमित्थमाह बुद्धद्रव्यस्य लोकसाधनता।
संभविनी पार्थिवादिचतुर्विधशरीरान्तर्भूतस्येंद्रियानाश्रयस्पर्शी
रत्वयाभोगसाधनत्वानुपपत्तेः नचाविषयत्वया रूपस्पर्शशून्यस्यारब्ध
स्यत्वप्रहितत्वेनाविषयत्वायोगात् शरीरेंद्रियव्यतिरिक्तोवयवीविषय
इत्यंगीकारात् नापींद्रियत्वया मनसएवेंद्रियत्वात्तद्दारचेंद्रियान्तरस्वी
कारवैयर्थ्यात् नचशरीरेंद्रियाविषयान्तर्भूतस्यकार्यद्रव्यस्यभोगसाधन
त्वंपरैरंगीक्रियते आत्मादीनांपुनरस्पर्शवत्वाश्शरीरेंद्रियविषयरंभास
भवात् समानमेवद्व्यणुकारंभवैयर्थ्यं इहपुनस्तमसोमूर्त्तत्वोरूपवत्तः
संभवात्तिभोगसाधनत्वमितितदारंभवैयर्थ्यं किंचास्मन्मतेनतमस्तमो
वयवैरारब्धं तस्यमूलकारणान्मेघमंडलान्महाविद्यकदाचिज्जन्मकत्वान्माभ्युप

प्र॰ह॰ गमात् नचमनसोनारंभकत्वं तस्यापिसावयवद्रव्यत्वेनपरिणामित्वाभ्युपग प्रदीपि॰
२॰ गमात् आत्मनश्चस्पर्शरहितस्यसर्वजगदुपादानकारणत्वाभ्युपग
४० माच्च चलत्वाद्यालोकवत्तमोद्रव्यान्तरं अन्यानुविधाननियमात्तस्या
भाविकंचलनमस्यघटरूपादिवदितिचेत् न द्रव्यस्यापिस्ववर्णादिवद्द्रव्यां
तरानुविधानेपिस्वाभाविकचलनोपपत्तेः तथाहि आकरजस्यते
जसःस्ववर्णादिःपार्थिवद्रव्योपष्टंभजन्यतानादिप्रतिभासोपितस्यस्वाभावि
कचलनमुपसर्पति किंचयदन्यानुविधानंकिमालोकावरकातपत्राद्यनुवि
धानं किंवानिवर्तकप्रदीपाद्यनुविधानं नाद्यः निश्चलेप्यचलादौतच्छायायाश्च
लनोपलम्भात् नापिद्वितीयः वैपरीत्यात् आलोकागमनेगच्छतिच्छायेति
प्रतीतेःगमनेचागच्छतीतिप्रतीते तद्विरोधित्वात्तदनुविधानानुपपत्तेः

किंच चक्षुःप्रकाश्यानां जन्यरूपवद्वीनामस्मं रूपिग्राहींद्रियत्वेनतयथैवास्य
प्रतींद्रियं चक्षुरालोकाजन्यरूपिद्रव्यसाक्षात्कारजनकं रूपिद्रव्यग्राहकेंद्रि
यत्वात्त्वगिंद्रियवत् न च रूपरहितेंद्रियत्वमुपाधिः यद्रूपवदिंद्रियं तदालोका
जन्यरूपिसाक्षात्कारजनकं न भवति घ्राणवदिति व्यतिरेकव्याप्तौ रूपवद्
ग्राहकत्वस्यैवोपाधित्वात् नीरूपद्रव्यमनस्त्वादिद्रव्यांतरमीति इत्थमालो
कवद्दृक्भावरूपत्वानत्मनो विरोधितस्मादात्मनो जगदवभासकस्य ज्योतिः
शब्दवाच्यत्वात् तस्य त्वं संगस्य हस्य संगानिरूपणाद्दृश्यप्रपंचस्य स्वतःपर
तस्यासिद्धेर्गात्मन्यध्यस्ततयैवसिद्धिरिति सिद्धमिथ्यात्वं २ किंपुनरिदंमि
थ्यात्वं प्रमाणागम्यत्वंवा १ अप्रमाणज्ञानगम्यत्वंवा २ अवयार्थज्ञान
गम्यत्वंवा ३ साधिलक्षणत्वंवा ४ सदसद्विलक्षणत्वंवा ५ अविद्यातत्कार्ययो

अ॰ सि॰
११

रन्यतरत्वं वा ६ ज्ञाननिवर्त्यत्वं वा ७ प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं वा प्रकृति-
८ बाध्यत्वं वा ९ स्वात्यंताभावसमानाधिकरणतया प्रतीयमानत्वं वा १०ः
नाद्यः ब्रह्मणोऽपि मिथ्यात्वप्रसंगात् तस्य स्वप्रकाशत्वेन त्वया सर्वप्रमाणगो
चरतानंगीकारात् नाद्वितीयः सद्वादिभिरपि तस्यांगीकृतत्वेनार्थांतरत्वा
त् तस्य तस्य शुक्तिशकलादेस्तेन तेन रजताद्याकारेण प्रतीयमानतया प्रा
प्रमाणज्ञानाविषयत्वात् सर्वस्य प्रपंचस्य लौकिकमिदं ब्रह्मकार्यमिदमनिर्वचनी
यमिदमिति चामिथ्यात्वज्ञानगोचरतायाः परैरभ्युपगमात् स्वप्नेऽप्रमाणात
याविद्विषयस्य तथात्वानंगीकाराच्च नतृतीयः उक्तदोषानुषंगादेव न चतु
र्थः साक्षिलक्षणस्यापि शशविषाणादेरमिथ्यात्वात् न पंचमः एकतर
निषेधस्यान्यतरविधिनांतरीयकतया तदसंभवात् न षष्ठः ज्ञाननिवर्त्य

नीयाविद्यायाश्च ध्वंसित्वात् अग्रहणमिथ्याज्ञानलक्षणाविद्यायास्तत्त्वा
र्यस्य च प्रवृत्तिसंस्कारादेः साध्यत्वात् न सप्तमः ज्ञाननिवर्त्यस्यापि ज्ञान
सुखादेः साध्यत्वात् स्वप्नदृश्यस्य त्वोपि परैरध्यासनिवर्त्यत्वांगीकारात् ज्ञान
नाष्टमः प्रमाणेन यदुपाधौ बाधः प्रतिपन्नस्तत्र तस्य निषेधासंभवात्
शून्यख्यातिप्रसंगात् भ्रांतिप्रतिपन्नोपाधौ तन्निषेधप्रतियोगित्वस्य सत्य
त्वेपि संभवेनार्थान्तरत्वात् शून्यख्यातिवादिभिरपि क्वचिद् विकृस्या त्रि=
स्यसत्त्वास्वीकारात् न नवमः बाधकज्ञानविषयत्वं अनिर्वच्यत्वं वा बाध्य
त्वमित्यभ्युपगमे पक्षपातपरतापत्तेः वस्तुतः शुक्त्यादेरपि बाधकज्ञा
नविषयत्वांगीकारात् बाधकज्ञानेन तदेवज्ञाननिवर्त्याभ्युपगमाच्च न द
शमः संयोगविभागशब्दात्मविशेषगुणानां प्रदेशवृत्तीनां स्वात्यन्ताभाव

प्र·कृ· सत्यानाधिकरणतया प्रतीयमानानामपि परैः सत्यत्वांगीकाराच्च तदर्थोत्तरत्रा प्रदीपि·
२२ याऽऽत्राक्रिकमत्वात् तदेवं तत्प्रपंचस्य मिथ्यात्वे न साक्षी नापि तत्र प्रमाणं तथा
हि नत्तावत्प्रत्यक्षं तेन वक्तुमत उक्तप्रकारेणात्यन्तमस्य प्रपंचमिथ्यात्वस्य
प्रत्यक्षसिद्धत्वे तत्र वादिनां विवादाभावप्रसंगात् नचाविवादपदं मिथ्या दृश्यत्वा
सूप ४५ त् शुक्तिरूप्यवदित्यनुमानं प्रमाणगम्यत्वस्य सदसद्विलक्षणस्याविद्यात्मका
र्ययोरन्यतरत्वस्य वा साध्यत्वेऽप्रसिद्धविशेषणत्वात् अयथार्थज्ञानग
म्यत्वस्य गृहमतेऽप्रसिद्धत्वात् इतरेषु च सिद्धसाधनत्वात् किंच दृश्यत्वं
नाम फलव्याप्यत्वं वा वृत्तिव्याप्यत्वं वा साधारणं वा नाद्यः शुक्तीदि
येषु तदभावेन भागासिद्धत्वात् न द्वितीयः ब्रह्मणोऽपि वेदान्तिभिर्वृत्तिव्याप्य
त्वाभ्युपगमात् अनैकान्तिकत्वात् न तृतीयः ब्रह्मण्यनैकान्तिकत्वादेव एते

तज्जडत्वाद्यंतवत्त्वपरिच्छिन्नत्वादयो हेतवो निरस्ताः तत्रापि साध्याविकले: अ
प्यायंपटः एतत्तंतुनिष्ठात्यंताभावप्रतियोगी दृश्यत्वाद्धटवदिति चेत् न
तत्तंतुनिष्ठात्यंताभावे दृश्यत्वहेतौ व्यभिचारादनैकांतिकत्वात् तयोर्दृश्यत्वेऽपि तं
तुनिष्ठात्यंताभावाप्रतियोगित्वात् प्रतियोगिनस्तंतुत्वे वा तन्निष्ठात्यं
ताभावस्याभावात्पटस्य तत्प्रतियोगित्व तदवस्थ्यसाध्याप्रसिद्धेः उक्तहेतूनामप्रयो
जकत्वात् किंच प्रपंचस्य प्रामाणिकत्वे मिथ्यात्वानुमानानां धर्मिग्राहकप्रमाणे
नबाधः अप्रामाणिकत्वे चाश्रयासिद्धिः प्रतीतिमात्रसिद्धस्याश्रयत्वे च
नृशृंगखपुष्पादेरपि प्रतीतिमात्रसिद्धस्य सर्वत्र संभवात् सर्वत्र विधिनि
साध्य X षेधप्रसंगः एवं तु दृष्टांतानामपि प्रामाणिकत्वे दृश्यत्वहेतोरुक्तत्वानैकांति
कता अप्रामाणिकत्वे साध्यसाधनाद्यभावादनुमानासिद्धिः नाप्यागमः

प्र.कृ. प्रपंचमिथ्यात्वेमानं तथाहि नेत्याद्येकमेवाद्वितीयं सत्यं ज्ञानमनंतं ब्रह्मे१ प्रदीपि.
२३ त्यत्र ब्रह्मणो द्वितीयत्वानंतत्वप्रतिपादनात् द्वितीयवस्तुनोऽभावः प्रतीय
23 त इति युक्तं वक्तुं अद्वितीयशब्दस्य नञ्समासजातीयवस्त्वंतरनिषेधपरत्वाद्
यस्मिन्ग्रामेयमेकएवाद्वितीयः पुरुष इतिवत् अनंतपदस्य च प्रागुक्तकाली
नात्यंताभावपरत्वात् नैव तस्य व्युत्पत्तेः अन्योन्याभावाधिकरणत्वान
तत्र धिकरणत्वस्याप्रसिद्धत्वेन व्युत्पत्त्यपेक्षणात् नेह नानास्ति किंचनेत्या
देः आगमस्यकारणे ब्रह्मणि नानात्वनिषेधपरत्वात् इन्द्रो मायाभिरित्या
देश्च तत्त्वादिप्रियच्छोरकबुद्ध्यादुपाधिभिर्मायाशब्दाभिधेयैः स्वशक्तिवि१
शेषैर्वाभेदनपरत्वे अपरप्रतिपत्तिविधिपरत्वेन प्रपंचानिषेधकत्वान् मिथ्याभावा
त् सत्योः सत्यमात्मेत्येवं विधायास्य स्तुतेर्भेददर्शननिंदया १ प्रतिपत्ति

विधिपरत्वेन प्रपंचनिषेधे तात्पर्याभावात् आगमस्य च स्वरूपावगतौ प
दार्थविभागप्रतिपत्तौ च प्रत्यक्षादिसापेक्षत्वात् प्रत्यक्षस्य चागमा
नपेक्षत्वात् मा हिंस्यात्सर्वाभूतानीत्यादिविरतावग्नीषोमीयं पशुमालभेतेत्यबाल
रागेन हंतव्यः प्राप्तिरथाहृत्यामालभेत गातिरात्रे षोडशिनं गृह्णाति नातिरा
त्रे षोडशिनं गृह्णाति उदिते जुहोति अनुदिते जुहोतीति च परस्पर व्याकुलत्वा
त् प्रत्यक्षादेस्तदभावात् आगमस्यापचरितार्थत्वेनापि तत्सावकाशत्वा
दत्वेवकारणत्वाद्विभेदस्याहिंसाप्रसंगः प्रत्यक्षादेः पूर्वसिद्धतया चागमेभ्यस्तस्य प्रतिष्ठित
त्वाद्विरोधे तेषामेव बाधात् श्रुतिकेत्यैकमेवाद्वितीयरूपाणि त्येकत्यप्रा
णावेसत्यस्य सत्यस्याभावादितिवत् प्रपंचस्य सत्यत्वप्रतिपादनात् विवाद
स्पदीभूतः प्रपंचः सत्यः प्रमाणसिद्धत्वादात्मवदिति अयं घटः एतद्विषः

स्व

25

प्र० क्रं० २४

क्रमभेदाश्रयः द्रव्यत्वात्सत्व. पं० १

बाध्यभेदात्तिरिंदिति अनुमानतोपि वियदादेरात्मनांच सत्यभेदसिद्धिः नचभेदस्य प्रतीपि॰
सत्यत्वेदृग्दृश्ययोः संबंधानुपपत्तिर्बाधिका तत्रत्प्रतिपत्तिहेतुभूतेंद्रियलिंगा
देस्तत्तद्विषयसंबंधादेव तद्रूपतत्तज्ज्ञानानां तत्तद्विषयप्रतिनियमसिद्धावन्न्येषा
पि संबंधान्तरस्यातिप्रसंगात्प्रसंगात् शब्दान्तराभ्यास संख्या देश्यकर्मभेद प्रतिपा
दक प्रमाणस्य भेदमिथ्यात्वे ऽप्रामाण्य प्रसंगः नचतत्त्वस्य लोकभेदसिद्धभेदानुवा
धकत्वसंभवः तो हि कुर्मां पूर्वभेदस्य लोकतो सिद्धेः सिद्धेवा शब्दान्तराद्यधिकरणा
नारंभप्रसंगात् न देवांमिथ्यात्वलक्षण प्रमाणयोरसंभवादनुमानाभासाभ्यो
प्रपंचस्य सत्यत्वापादनात् न मिथ्यात्वमिति भवोच्यते. तत्रादिलक्षणासंभवः
यतः सर्वेषामपि भावानां स्वाश्रयत्वेनाभिमतास्तत्त्वादयो येतान्निष्ठात्यं
ताभाव प्रतियोगित्वे वतेषां मिथ्यात्वं नहि तेषामत्यन्त सत्ता संभवति

तत्राकिंचेत्स्यान्न स्यात्तदा गलेपादुकायेनम्स्यात्वमेव पर्यवस्येत् नचानिराध्येयेषु
नित्येष्वभावेषु सा नास्तीति लक्षणस्याव्याप्तिः ब्रह्मणोतिरिक्तस्य कृत्स्नस्य
कार्यत्रितयाकारेण भिन्नत्वस्य व्यवहारदशायां रजतादिवस्तुनो बाधाधीन
त्वायाः स्वीकारात् नाप्यतिव्याप्तिः सत्यस्य ब्रह्मणो निराश्रयसत्त्वस्य नाति
ष्ठात्यन्ताभावप्रतियोगितायाः शंकितुमप्यशक्यत्वात् नच परैः प्रदेशाव
च्छिन्नतयाभ्युपगतेषु संयोगशब्दादिषु सत्येष्वपि लक्षणस्य सद्भावादव्याप्तिरिति
ता भावाभावयोरेकाधिकरणत्वाभ्युपगमे सर्वत्रैव तत्तदभावापत्तेः विरा
धस्य जगति दत्तजलाञ्जलितापसंगात् भावाभावयोर्हि साक्षाद्विरोधस्त
न्मुखेनैवान्यत्रापि पर्यवसायकमिति सर्वसंमतत्वात् प्रदेशोपाधिभेदस्वीकारात्तु
विरोधसमाधानेपि भावात्यन्ताभावयोरभिन्नाधिकरणत्वेन तद्विरोधस्य तत्र सत्त्व

प्र॰द्रु॰ कुतःसंभवः कुतस्तरां चातिव्याप्तिः कुतस्तमां चार्यंतिरक्ता तदेवं तु मिथ्यात्वप्रतीपि
२५ न्नातिरक्तिः नापि मानासत्वं अनुमानस्याश्रयासिद्धेः तथाहि अंशिपितः
25 स्वांशगात्यंताभावस्य प्रतियोगिनः अंशित्वादितरांशी वदितिपेचेवपु
पयादिषु १ विमतः पटः एतत्तंतुनिष्ठात्यंताभावप्रतियोगी अवय
वित्वात् पटांतरवत् एवमेतत् द्रुणकस्यजान्याद्यायोपि तत्तंत्वंतनिष्ठा
त्यंताभावप्रतियोगिनः अंशे द्रुणत्वादितरत्तत्द्रुणवादिति एवमा
दिप्रयोगः सर्वत्रैवोह्नीयः तत्रांशेप्रामाणिकेतावन्निष्ठात्यंताभावप्र
तियोगित्वसाध्ये किंचित्प्रतिभासिकात्यंताप्रतियोगित्वं तापेः भाव॰
अभावानां प्रामाणिकत्वे नैरवदेतापत्तेः प्रामाणिकाभावप्रतियो॰
गित्वे भावानां पिप्रामाणिकत्वयातामिथ्यात्वासिद्धिः नाद्वितीयः

रजतेऽसीत्यादिभ्रमस्ती सम्मेवेत्तत्र रजतत्वमिति रजते रजतत्वं प्रतियोधम्प्र
त्रिभासिका सत्ता भावप्रतियोगितावि रजते त्वस्याम्ययाले तावन्
रत्वापाताादिति चेन्न मैवं प्रागभावानां प्रामाण्यकत्वेऽपि सद्वैताव्याकि
पात केथं चव्याहारिकप्रमारोपणस्थापितत्प्रागभावे प्रागभावे भावेकमन्तेना
वेदन प्रमारोपणीतस्याद्वैतस्य व्याकोपाशक्याकाशः नापि प्रामाणि
काभावप्रतियोगितापि शुक्तीदमंश रजतकाराद्व्यालिङ्गितस्वप्रसंसर्गस्येद
रजतमित्येकज्ञानोत्पत्तेस्तस्य केवलं न व्यवहारोपत्तेस्तस्य बाधोत्तरं रजता
कारारोपारोहिण्णेव हि यस्य वा कुत्रचिद्देशे काले वा केनचिदपि बाधितस्त्र
सत्त्वासत्त्वे किं यत्ते येतत्प्रामाणिकाभावप्रतियोगिनः सत्त्वाभावाः
प्रतिपाद्येरन् द्वितीय सुकल्पो नेगीकारपरास्तः न च घार्मिग्राहकम

प्र० क्रू०
२६
26

माणबाधः धर्मिणस्तत्त्वावेदकप्रमाणसिद्धत्वानभ्युपगमात् नह्याश्रया प्रसिद्धि-
सिद्धिरिति चेत् न सांव्यवहारिकप्रमाणोपनीतस्याश्रयत्वोपपत्तेः
प्रपंचस्तत्त्वावेदकप्रमाणविषयः धर्मित्वादात्मवदिति चेत् न सा
ध्यवस्यैव तत्त्वोपाधित्वात् न च व्यतिरेकासिद्धिः अन्तात्मनः श्रुतिर
जतसंसर्गादेस्तत्त्वावेदकप्रमाणाविषयस्योभयवादिसिद्धस्य व्यतिरेकोपसंहार
स्थलस्य सद्भावात् धर्मित्वहेतोः शुक्तिरजतादिसंसर्गे धर्मिणि व्यभिचार
राच्च नासौ धर्मी मिथ्यात्वादिति चेत् न एतन्मते वस्तुतो प्रातिधर्मित्वाध
र्मित्वयोरसद्योगात् एतेन प्रतीतिमात्रासिद्धस्याश्रयत्वे दूषणाभूय
णादेरपि तत्प्रामृतस्य सुलभत्वात् सर्ववादविप्रतिपत्तिविषयप्रसंग इति प्र
पास्तं वादिप्रतिवादिमध्यस्थानां प्रमाणसिद्धमेतादितिसमं ह लेव

तत्र यात्रिचक्रकक्षाविश्रांतस्य तत्तदाभासलक्षणानालिंगितस्याश्रयस्य द्व
धर्मानुभूयमानदेशत्व तत्र तत्र कथांगतांगीकारात् नाहश्च व्यावहारिकप्रमाण
सिद्धस्यैव च व्यावहारिकसत्यत्वेन स्वीकारात् सर्वथाबाधवैधर्म्यस्याऽ
गमेतरप्रमाणयोस्सर्वज्ञेनज्ञातुमशक्यत्वात् एतेनैतदपास्तं यदाहुर्भ
ट्टाचार्याः संवृत्तेर्नहि सत्यत्वं सत्यभेदः कुतोन्वयम् सत्या चेत्संवृतिः
केयं मृषा चेत्सत्यता कथम् १ सत्यत्वं न च सामान्यं मृषार्थपरमा
र्थयोः विरोधान्नहि वृक्षत्वं सामान्यं वृक्षसिंहयोरिति वस्तुतोऽस
त्यस्यैव याबाधं देहात्मभाववल्लौकिकवैदिकव्यवहारांगतया सत्य
त्वेन व्यवहारात् नायमसिद्धो हेतुः घटस्याघटत्ववादिताविबाधा
न नापि विरुद्धः एतत्तेनानित्यस्यत्वाभावप्रतियोगिताविपदे त्वा

प्र॰ कृ॰ २७

४७

न्यतिप्रसंगित्वस्यावृत्तेः तान्नैकांतिकोपि विपक्षाद्व्यावृत्तेरेव इत्युक्तं प्रदीपि॰
तं भूपट इत्यादिनैव प्रत्यक्षदोषत्वेनोक्तं निष्कृष्टतया पदस्याव्युत्पन्नत्वादुपहतो
विषयतया मूलास्पष्टतयापादितोस्तीति चेन्न मैव पदस्यैतत्तिकानैकांत्य
त्वाभावप्रतियोगित्वस्यांगीकृतत्वात्तस्य प्रमाणत्वानंगीकारादिहरूमु
सितीतिस्मीति प्रत्यक्षाभिमतप्रत्ययबाधेन तत्पिक्षानुमानप्रवृत्ति
वदत्रापि अनुमानप्रवृत्त्युपपत्तेः नचैवमसाविदहनत्वेनासिद्धानुमानता
स्य प्रतिबद्धप्रसरतया कालात्ययापादिष्टक एव सर्वत्रैवास्तामित्यादि
तिवाच्यं नवतवामपवादिसंमत दुर्बलप्रमाणापरिपापितिक्षा
प्रतिहतस्यानिरंकुशप्रसरत्वात् प्रवृत्तिवधाभावाभावात् एतेन प्रमा तथा
णासिद्धत्वादिति प्रत्यनुमानविरोधापास्तः प्रमाणासिद्धत्वस्यैवासिद्धेः

यत्र प्रत्यक्षमपि नतत्त्वावेदकं प्रमाणं तत्र का कथा तत्तदुपजीविनो व
राकस्यानुमानादेः प्रमाणतायाः यत्तु नैरेतस्य घटस्य पृथक्त्वादेतानि
षड्वा ध्वंसभेदातिरिक्तानि दवस्थानुमानं तत्कथं प्रमाणमविरोधात् का
लात्ययापादिष्टमित्युपेक्षणीयं सत्तित्वं वस्तुस्वामित्यागमेन
प्रपंचस्य सत्यतावगमाद्वैतागम एवोपचारितार्थः किं न स्यादि
ति चेत् न तस्यान्यपरत्वात् तथा ह्येकविज्ञानेन सर्वविज्ञानं प्रति
ज्ञाय प्रसंगः सर्वकारणतया सर्वकार्येणन्यत्वं ब्रह्मणः प्रतिज्ञातार्थप्र
तिष्ठा उपपादयितुं लोकेऽपि घटरुचकादिकार्याणां मृल्लोहादिका
रणादनन्यत्वं दर्शयति श्रुतिः केन्यवस्तु वाचारम्भणं नामधेयं मृत्तिकेत्येवा
सत्यमित्यादिना तत्त्वतो वाचारम्भणमात्रमिति एतदात्म्यमिदं सर्वं तत्सत्य
त्वं

प्र॰कृ॰ त्वंसंस्थात्वे त्वंतेत्रलक्षणएवसमन्यत्वप्रतिपादकत्वविरोधात् एतेनामिथ्यात्वानु प्रदीपि॰
२८ मानस्यागमविरोधोव्यपास्तः दृग्दृश्ययोः संबंधानुपपत्तिप्रसक्तत्वानुमा
४१ नस्यबाधिका नचकरणसंबंधादेवसंबंधोपपत्तिः ईश्वरज्ञानेऽकरण
जन्येऽपि विषयाणांस्फुरणात् करणजन्येष्वपि योगिज्ञानेषु ऊष्मावस्था
यामंतःकरणसंबंधानपेक्षितानागतानांवाघाध्यातानांच स्फुरणात्
नचमनसावाभिसंधिःसंबंधः परतंत्रवाहिमंत इतिन्यायात् अस्मदादीनां
चेंद्रियकाविषयमेविन्द्रियासंबद्धानामेव स्फुरणांगीकारात् अस्मदादिप्रमा
णजन्येऽपि ज्ञाने सोऽयंदेवदत्तइत्यादौ तत्तास्यकरणासंबद्धस्यापि प्रत्यक्ष पा
तान्युपपत्तेः नचमतांतामपीन्द्रियेणासहतायुक्तावैशेषिकसता ल
क्षणःसन्निकर्षः समवायेतस्माभावस्येन्द्रियसंप्रयोगमंत्ररेणापि प्रत्य

ज्ञातायामयंपर्वतोवह्निमानितिनिश्चयात्मिमत्वस्यापिसंयुक्तविशेषणस्तयाग्र
ह्यतत्वापत्तेः प्रत्यक्षधर्मिकानुमानस्यापि प्रविलयप्रसंगाः [illegible] वस्तुनोहिज्ञानज्ञे
ययोर्विषयविषयिभावः संबंध इति चेत् न तदनिरूपणात् तथाहि
ज्ञातावह्निजन्यफलाधारत्वं विषयत्वं विषयातिष्ठफलजनकत्वं वा विषय
यित्वमिति युक्तं विकल्पासहत्वात् तत्फलं व्यवहारो वा नाद्यः ज्ञातता
तीतादौ तदभावेनाविषयत्वप्रसंगात् नत्रैव फलजननेऽप्यनुगतानियाम
मकायोगात् तद्योगेवा तस्यैवाविषयत्वात् तियामकत्वोपपत्तेः नाद्वि
तीयः करणकर्षणादेर्व्यवहारस्यात्माधावभावात् कलधौतमला
देरपितांतरीयकतयातद्व्यवहारविषयस्य तद्ज्ञानविषयत्वापत्तेः
नापीच्छादिरात्मन एकतदाधारतयातदन्यस्याविषयत्वप्रसंगात्

प्र॰ कृ॰
२९
71

प्रत्यक्षज्ञानप्रतिबन्धकतादिलक्षणज्ञानगोचरत्वं तद्योग्यत्वं वाविषयत्वं न. प्रतीपि॰
ज्ञानगोचरत्वस्यैवानिरूप्यमाणत्वात् हानादिज्ञानानां च हानादिज्ञानो
त्पाजनकतया निर्विषयत्वप्रसंगात् जनकत्वे वा हानादिज्ञानानुपरमा
त् विषयान्तरसंचाराभावः सुषुप्त्यभावश्च प्रसज्येयातां व्यवहारयोग्य
त्वं विषयत्वमित्यंगीकारे च योग्यतायायोग्यतान्तराभ्युपगमेनवस्था न
दनभ्युपगमे योग्यताया विषयत्वाभावः अलमिहलक्षणान्तरगवेष
णायाम्परिश्रमेण यस्यां संविदि योर्थोवभासते स तद्विषय इति लक्षण
निरुक्त्युपपत्तेरिति चेन्न नैवं विकल्पासहत्वात् संविदीति सप्तम्या
किमधिकरणत्वं विवक्षितं अथवा विषयः किंवा सवाधिष्ठानत्वं सति सप्त
मी वा नाद्यः घटादिद्रव्याणां वाह्यानामान्तरसंविद्गुणाधिकरण

तानुपपत्तेः न द्वितीयः तस्यैव निरूप्यमाणत्वात् संविदो विषयत्वं
घटादीनां च विषयित्वमिति वैपरीत्यापत्तेश्च न तृतीयः संविज्ञान
कतया तत्संबंधिनो नयनादेर्द्रष्टादेरपि तद्विषयत्वप्रसंगात् संविदि भासत
इति भासमानताया विशेषणत्वात् न तत्पक्षादावतिप्रसंग इति चेन्न सा
भासमानताया एवाद्याप्यनिरूपितत्वात् न चतुर्थः भासमानत्वात्
तेनैव ज्ञानाकारसमर्पको हि विषय इति चेन्न ज्ञानतत्तदाकारयोर्भेदाभावे
न सर्वेषामपि ज्ञानहेतूनां तदाकारसमर्पकतया विषयत्वप्रसंगात् इष्टव
मानतया तदाकारसमर्पको विषय इति चेत् नाद्यस्य भासमानताया एवाद्याप्य
निरूपणात् न च ज्ञानकर्मत्वं विषयत्वं अतीतादिज्ञानस्येश्वरज्ञानस्य च
कर्मकारकाजन्यत्वेनाविषयत्वप्रसंगात् संबंधान्तरमन्तरेण ज्ञानस्य च

30

विशेषणांसस्तद्विषयः विशेष्यं च विषयीति चेन्न न समसमवेतत्वरूपज्ञा
नामित्यत्वव्यभिचारात् नैवं धात्वर्थमन्त्रे रौ समवायेन वा यस्य रूपज्ञानं तस्य
चाविशेषणाविशेष्यभावोपि मन्त्रसमवायरूपज्ञानत्वाद्विषयविषयित्वा
भावात् नतु समवायस्यानुपपत्त्या ज्ञानविषयत्वाविरूपज्ञानाविषय
त्वात् नस्यैव विषयाविषयिभावानिरूपणात् ज्ञानज्ञेयानन्यत्वसत्तयोर्वा
सिद्धौ प्रपञ्चस्य सत्यत्वेऽप्यपत्त्यानुपपत्तिर्वाधिकानिरसितत्वात् नन्वेतदस्य
मिथ्यात्वे शास्त्रवादैः कर्मसिद्धप्रतिपादकस्याप्रामाण्यप्रसंगः घट
पटादेरिव व्यावहारिकस्यैव भेदस्य तत्कर्मगोचरस्य न वेत्तत्र शब्दो
न्तरादिभिः प्रतिपाद्यमानत्वात् ज्ञानवा धार्यायोग्यत्वाल्लक्षणान्तरस्य सत्वस्य
प्रतिपादने तद्योग्यो दासीन्यात् तदेवाद्वितीयसमस्तप्रत्यनीकमनुमा

नं प्रपंचमिथ्यात्वे मानमिति सिद्धं तत्तस्यानुमानस्यामिथ्यात्वात्किं मनुमानांत
रेणासिध्यति किं वा स्वेनैव आद्ये तवस्था तस्यानुस्यानुमानस्य मिथ्या
त्वसाधते नुमानांतरापेक्षणात् जिज्ञासायां सत्यां तत्रापन्नुमानप्रवृत्तेरनवि
वस्थापत्तेः प्रकृतिरिति चेन्न यच उक्तं साधनीभूत कसाध्यामितिव्या
प्तिमूलत्वण्समयाप्तस्य तस्यानुमानस्य मिथ्यात्वानधिगमे सर्वोपसंहार
वती व्याप्तिर्नासिध्येत् आद्ये धिगमेवतत्तदधिगमायो तत्तदनुमानांत
रत्रैदेवापेक्षणीयामिति कथं कथंतमूलदोषनिः द्वितीये तु स्वात्म
नि वृत्तिविरोधः स्वगतामिथ्यात्वस्य स्वेनैव संहरणादिति चेन्न मै
वं यावद्यावद्वस्तुप्रपंचस्य सत्यत्वानुमानवद्व्यवस्थापनाविधिविरोधेन
ठ तदुक्ता व्यवस्थापनाविधिप्रयुक्तमध्यवस्थाप्य तस्याध्यापनाविधि

प्र॰कृ ३१ प्रयुक्तत्वात् तथा हि अध्ययनविधिर्नस्वविषयाध्ययनस्यानुष्ठाप प्रदीपि॰
नत्वम: नियोज्यत्वात् न स्वर्गकामी जीवनादिनिमित्तवान्याक
स्मिन्नियोज्यः प्रतीयते नापि विश्वजिदादिवत्कल्पयितुं शक्यः अ
ध्यापनविधिप्रयुक्तत्वेनैव तादृशस्याध्ययनस्य सिद्धत्वात् नियोग्या
सिद्धेः कल्पकाभावात् नचाध्यापनविधेरपि तादृशनियोज्यतया तदनु
ष्ठापकत्वम् आचार्यकरणकामस्य नियोज्यस्य प्रतीतेः तथाहि
अस्त्वयं ब्राह्मणमुपनयीत तमध्यापयीतेति श्रुतिः तत्र समा य
नतो हि संजाताचार्यकरणानि सूत्रेणाचार्यकरणे नयतेरात्मनेप
दविधानात् उपनयीत तमध्यापयीतेत्युपनयनाध्या
पनयोरेकप्रयोगतावगमात् उपनयनहेतुकाध्यापनसाध्याद्

चार्यत्वप्रतीतेस्तत्कामिनो नियोज्यत्वावगमात् नानित्यनियोज्यत्वाद
ध्यापनविधेः तस्यावश्यविषयस्याध्यापनस्यानुष्ठानं प्रयुंजानो ध्या
पनविधिस्तन्निष्पादकमध्यापनमपि प्रयुंक्ते तेन विद्याप्तिफलद
स्योपादानप्रमाणतात्वत एवाध्ययनसिद्धेर्नाध्ययनविधिप्रयुक्त
मध्ययनमिति अथोच्यते भवन्तु नाम सर्वे नियोज्यता ध्यापनविधेः
तथापि न ध्यापनविधिप्रयुक्तत्वमध्ययनस्य सिध्येत्र कामा
धिकारेवरणापार गस्य प्रवर्तकत्वादध्यापनस्यापि काम्यत्वात्
नाधिकवरागाणावतो विध्यन्दकेऽध्ययनेऽनुष्ठानलाभात् मध्या
पनविधेरनुष्ठापकत्वकल्पनानुपपत्तेः न चाध्यापनाङ्गत्वाद
ध्ययनविधेरप्रवृत्तिराशंकनीया नत्वयात्यादीनामन्यकर्तृकम

ॐ=

प्र॰क्र॰ प्रमाणस्यादर्शनात् मन्त्राध्यापनविधिप्रयुक्तत्वादध्ययनस्य तदंगत्वं प्रक्षिप॰
३२ प्रयुक्तोर्थव्यभिचारात् नहि मित्रेज्जुहोति स्वकं तो होतेतीत्यादौ भेदनादिता
प्रयुज्यमानो होमस्तदंगमंगीक्रियते तत्प्रयुक्ते ध्ययनस्याचार्याप्यासि
द्धेरंगत्वेन प्रयुक्तिः प्रयुक्तोऽध्ययनदसहं वामितिपरस्पराश्रयत्वाचाकिंचा
ध्ययनविधावधिकारिण मृग्यं कि वनृपाविंयोऽन्यः कस्मादंगस्वीक्रियत इ
तिवाच्यं अनुष्ठातसिद्धयोर्नियोज्यापेक्षत्वात्: ऋत्वान्यत्र एवासिद्धामिध् स्ति=
त्तिनासावंगीक्रियत इति चेत् नहि आधिकार्यपितापेक्षणीयः अनु
ष्ठानस्यान्यत एव सिद्धेः अधिकारी विधिपर्यवसानतायां पेक्ष्यत इ
ति चेत् नियोज्यापेक्षत्वे नैतावता विना नियोगापर्यवसानात्
अन्यतोऽपि विषयानुष्ठानासिद्धावतियोगासिद्धेः कामनामविषये ।

पर्यवसानवाचो युक्तिः किंचात्राध्यापयीतेति च नायमध्यापनवि
धिः वृत्त्यर्थत्वेनाध्यापनस्य याजनवत्प्राप्तत्वात् उक्तं हि षण्णां तु
कर्मणामस्य त्रीणि कर्माणि जीविका याजनाध्यापने चैव विशुद्धा
च प्रतिग्रह इति तस्माद्यथैतया त्राचकामं याजयेदित्यादिवृत्त्या
जनं नाविधीयते किंतु एतया त्राचकामो यजेतेति वाक्यार्थः
रस्फुरणे संशयापातेन निःशंकप्रवृत्त्यनुपपत्तेः अस्ति चानभ्यासदशा
यां तव वनस्थलीस्थितेषु फलितरसालादिषु तत्फलादानेच्छोर्निः
शंकप्रवृत्तिः अपि च त्वयापि पारलौकिकफलसाधनेषु निःशंक
प्रवृत्तिः स्वप्रामाण्यनिश्चयाधीना उपपाद्या न च वक्तृदोषशंकायामपि
प्रवृत्तिर्दृष्टेति वाच्यं तत्रापि निःशंकप्रवृत्तेरभावात् एवं यत्र यत्रानिः

प्र.मु. प्रामाण्यवृत्तिः तत्र तत्र प्रामाण्यनिश्चयाधीनैव संप्रवृत्तिरभ्युपगन्तव्या अपरथा प्रदीपि-
९६ प्रामाण्यानिश्चयान्निवृत्तेरपि प्रसंगात् न च फलेऽपि परतस्त्वं तथा हि
वृत्तिलक्षणफलस्य ज्ञानमात्राद्देवासिद्धेरुपादानादीनां जनार्थसाधना
द्विज्ञानाधीनत्वात्तद्विषयप्रमाण्यस्य तत्रापि फलजनकत्वस्य च तदा
व तस्मादेव धीर्यै विगुणगुणान्तरापेक्षैव दोषाभावस्वरूपैव चार्थ-
मावेदयन्ति वेदाः इति सिद्धं ॥ ९९ ॥ ननु स्वरूपसहकारिसम्बन्धाति रिक्तां
प्राप्तिमेव न जानीमः तत्र प्रमाणाभावात् न च प्रादिः स्फोटादिलक्षण
कार्यान्यथानुपपत्तिः तत्र प्रमाणं श्रुतोपादानोपादेयवानिय मानु-
पपत्तेः नाग्निः स्वरूपाग्नेः पावकादेः प्राप्तिर्वर्धकाभावादि सहका
र्युपबृंहितात्स्फोटादिलक्षणकार्यान्यत्वानुपपत्ताववतीन्द्रियप्राप्तिक

लसतानुपपत्तेः नवाभावस्याकारणत्वात्प्रतिबंधकाभावो न सहकारीति सांप्रतं॰ कि
मन्वयव्यतिरेकित्वं नासुताभावस्य कारणत्वे तिष्ठप्रसक्तिर्नाद्यः भाववदभा
वस्यापि कार्यान्वयव्यतिरेकित्वात् न द्वितीयः योग्यानुपलब्धेरभावप्रमि
स्य तिहेतुत्वात् विवेकाग्रह[illegible]चविभ्रमहेतुत्वात् ननु किं प्रतिबंधकप्रागभावस्य
कारणत्वमुत तत्तद्ध्वंसस्य नाद्यः उत्तेजकसद्भावे सत्यपि प्रतिबंधकवि
नाशप्रागभावे कार्यदर्शनात् न द्वितीयः प्रतिबंधकानुदयेपि कार्योपलब्धे
रिति चेन्मैवं उत्तेजकमणिमंत्राद्यभावसहकृतस्यैव प्रतिबंधकस्य प्रतिबं
धकत्वात् तेन तत्र प्रतिबंधकप्रागभावसहितस्यैव कारणत्वे [illegible] व्यभिचारः ना
प्येवं नैयत्यहेतुकत्वमप्युपपत्तेः सर्वत्र प्रतिबंधकसंसर्गाभावविशिष्ट ०
स्यैव कारणत्वांगीकरणात् अन्यथानुपलब्धेः फलोपलब्धिप्रागभाव

प्र॰ कु॰
८७
९७

वप्रध्वंसाभावविकल्पेनाभावप्रमितेरनियतहेतुकतायाः दुःपरिहरत्वात्॰ शक्ति प्रदीपि॰
पदे प्रतिबन्धाया एवतस्याः कारणत्वादभावविकल्पोत्थदोषतत्परिहारयोः
समानत्वात्॰ ननु न प्रतिबंधकाभावस्यकारणता॰ प्रतिबंधापेक्षत्तदभावः
कारणं कारणापेक्षस्वतदभावः प्रतिबंध इत्यन्योन्याश्रयप्रसक्तत्वात्॰ प्र
तिबंधो विसामग्रीत्वज्ञः प्रतिबंधकस्स्वंगीकारादिति चेत् नैवमवधीर्यैवा
भावस्यकारणता कार्यानुदयमात्रेणैव मण्यादेः कार्यप्रतिकूलतावगमा
त् अत वेलंब्येवव मारीमंत्रादेः कार्यप्रतिबंधकतातदभावस्यान्वयव्य
तिरेकाभ्यामेवकारणताध्यवसायात् किंचैवमन्योन्याश्रयप्रसङ्गस्तौ
त्रप्रोवास्यात् नाद्यः मंत्रतदभावयोः परस्परहेतुत्वाभावात्॰ नापिद्विती
यः मंत्रातयोरपिमंत्रतदभावयोः कार्यप्राप्तिप्रतिकूलत्वकारणत्वयोरुप

पत्तेः ननु कार्याभावव्याप्यकार्यप्रतिकूलभावा मंत्रादयः शक्तेरेव हेत्वाय
कारणाभावरूपा इष्यंते अत एव मंत्राद्यभावोपि कारणमिष्यते तत्तोर
मंत्रतदभावातिष्टप्रतिबंधकत्वकारणत्वयोरन्योन्योपाधिकत्वाडुस्तत्तो
त्तरप्रोवात्योन्याश्रयता दुर्वारेति चेन्न उक्तोत्तरत्वात् अंतरेणैवभा
वस्य कारणतावगमं मंत्रादेः कार्याभावमात्रेण कार्यप्रतिकूलभावत्व
स्यावधारणाश्रावकत्वात् तदभावकारणत्वस्याप्यन्वयव्यतिरेकाभ्यामेवाव
करावगमत्वादिति नव शक्त्यनंगीकारे प्रतिबंधासंभवः मणिमंत्रादि
संनिधानासंनिधानयोः स्वरूपस्याविशेषादिति वाच्यं कार्यैदासिन्यस्यै
व प्रतिबंधशब्दाभिधेयस्याविषत्वात् अन्यथा शक्तिपक्षेपि प्रतिबंध
स्य दुर्विवेकत्वात् नहि शक्तेर्नाशः प्रतिबंधः प्रतिबंधापाये कार्याभावप्रसं
गो

प्र॰ कु॰
९८

98

गात्र नवस्फोटाख्यकार्योत्पत्तये प्राक्तनं तदत्रोत्पन्नम्॰ तत्कारणातिरि- प्रदीपिका
क्तस्यात् नव प्रतिबंधाभावःकारणमभावस्यकारणत्वानंगीकारात्
अंगीकारे वा तस्यैव स्फोटादिकार्यजनकत्वमस्तु हुतमतींद्रियश
क्तिकल्पनादुर्व्यसनेन शक्तेः प्रतियंत्रसमातीव ध्वंसशक्तिवदतो नवस्या
तत्कस्मात्कार्यस्यान्यथानुपपन्नत्वाभावान्नातींद्रियशक्तिकल्पनावकाशः
नापि द्वितीयः उपादानोपादेयभावनियमस्याप्यनादिसिद्धद्रव्य
वहारावसितत्वात्का पुनर्दहनस्य स्वभावभेदादेवोपपत्तेः अन्यथैवम
हेवाकिमिति शक्तिर्नित्या चेति पर्यनुयोगेऽकः स्वभावभेदादन्यः परि-
हारः स्यात् तस्मादर्थापत्तिर्द्वयमपि न प्रमाणम् अस्तु तर्ह्यनुमानं
तथाहि विमतमजनकदशातो जनकदशायामतिशयवद्योगिका
ना

रकत्वात् कंठकुठारवदिति चेत् न सहकारिसमवधानाख्यातिप्रावे
नैवासिद्धसाधनत्वात् अस्तु तर्हि योगिरतीन्द्रियसामान्यवान् क्रियाश्र
यः कारणत्वात् कुठारत्वाश्रयवदिति प्रयोगः तेजो घ्राणकमतीन्द्रियरूपस्प
वायोश्चाधिकरणमिति तत्र आवृत्यर्थमतीन्द्रियसामान्यवान् क्रियेत्युक्तमतः शक्ति
सिद्धिरिति किं भिन्नम् योगिस्वीकारवादिनं प्रतीन्द्रियविशेषगुणस्याप्रसिद्धत्वात्
न विमतं तत्त्वकृत्वजातिविषयमिन्द्रियत्वात् अस्मदादिवदित्यतीन्द्रियसिद्धिर
ति चेन्न योगिनमनङ्गीकुर्वतां मीमांसकस्याश्रयासिद्धेः तत्सिद्धौ वा धर्मि
ग्राहकप्रमाणबाधात् अस्तु तर्हि अस्मदाद्यभिप्रायेणातीन्द्रियत्वविषयो धर्मा
मैवं अनध्यवसायप्रसङ्गाच्च तेषामसर्वस्यास्मदादिविषयत्वस्वीका
रेऽपि सर्वेत्तिदोषतादव न अनध्यवसायेतरास्मदाद्येन्द्रियकवृत्त्यगोच

रप्या=

प्र॰कृ॰ ९९ रत्वाभिप्रायेणातीन्द्रियत्वाविशेषणमिति चेन्न प्रमाणान्तरोपनीतत्वविशेष दी॰ प्रत्य॰ वि॰
णावगाहि विशिष्टज्ञानत्वात् सर्वेषामप्यैन्द्रियकत्वसंभावनया एवं चोक्तदोषाप
नुत्थानात् आश्रयपदस्य च समवायप्रतियोगित्वाभावे हृदयस्य समवायानङ्गीकार
वादिनोऽप्यसिद्धविशेषणत्वात् वह्नौ तैरव्यापकसंस्कारासिद्धेः सिद्धसाध स्थि=
नत्वाच्च॰ ननु कथमसिद्धसाधनत्वं तत्र तद्विमानताभावादिति चेन्मैवं विकल्पः
स्थितस्याव्यापकसंस्कारवत्त्वे पवनत्वात्कटवादिष्वनुमानसद्भावात् नचास्य
तद्व्यापककार्यवत्त्वमुपाधिः उत्पन्नमात्रविनष्टकटादिष्वकार्यानुपलम्भे
पितस्याविधसंस्कारास्युपगमेन साध्याव्याप्तेः किंच परस्यासिद्धत्वानुसार
णासिद्धसाधनताऽऽहयात् सकम्पमनुमानमात्रैरपि स्वविशिष्टानामप्यव्याप्ते
न कम्पवन्तदीयसिद्धसाधनताभिधानं प्रत्याख्येयेन॰ अस्मत्कृतान्तस्थितस्या

पकेत्तरसातींद्रियसामान्यवान्निः क्रियाश्रयवृत्तिमयोगइतिचेन्न मैवं तार
प्यापिकर्माश्रयत्ववादितंप्राभाकरंप्रत्यपर्यंतिरत्वापातात्पक्वेतरसातींद्रि
यसामान्यवान्निःक्रियकर्माश्रयत्वात्कारणत्वादितिहेतोःशब्दप्रानैकां
तात्‌शक्तोष्यशब्दस्तत्रात्पपगमेऽनवस्थापातात् जनकधात्किंयो
गीनएवकारणत्वेनाविवादितत्वान्नशक्तावनैकांतिकत्वेतिचेन्मैवं
प्रात्क्रियोगित्वस्यविशेषणस्यशब्दतासिद्धावसिद्धमतोतरात्तासिद्धोक्त
त्तमनयायपक्वपाकदर्पनयाः गुणादावनैकांत्यंच गुणादेरपक्वातीं
द्रियसामान्यवान्निः क्रियाश्रयत्वेचघटादिवद्द्रव्यत्वप्रसंगात्‌नयपाक्रिया
न्यायाश्रयत्वोपपत्तेः अस्तत्राहिविवादाध्यासितःस्फोटउभयवादिसंप्रति
पन्नस्फोटकारणातिरिक्तकारणजन्यःकार्यत्वाद्घटवदितिप्रयोगश्चाति

प्र॰कृ॰ केनैव प्रतिबंधकाभावेन प्रतिवादिनोऽकं प्रतिपन्नेन कारणेनासिद्धसाध्य प्रक्षेपि॰
१०० तत्वात्॰ भावजन्यश्रुतिविशेषणयोर्द्वयोरप्यसिद्धसाधनत्वात्॰ ननु मान्द
100 दर्थापत्तिः प्रमाणं मास्मभूदनुमानम् व्रीहीन्प्रोक्षतीति तदन्यथानुपपत्त्यादधी
तय तेत्याद्याः क [illegible] एव प्रमाणं तथाहि व्रीहीनित्यादिवाक्ये द्वितीयाश्रु
त्यावगमं छ तीत्यादिविवक्षितं द्याद्यीतांकर्मतावगमात्तेषु काम्भ्र
दत्तीप्रियः प्रोक्षणजन्यो गतिशयो वाच्यतीत्यवसीयते दृष्टस्य फलांतरस्या
दर्शनात्तत्समवायमात्रिष्टापवः आकीर्तिरिति शक्तिवार्दिभिरंत्यघतः इति चेत्त संवं
संस्काराख्यादृष्टस्य चेतनगतस्याचेतनेषु व्रीह्यादिषु समवायासंभ
वात्॰ घटविषयज्ञानजनितभावनाया घटाविषयत्ववत्व्रीहिप्रोक्षणा
धनूत संस्कारस्यापि तद्विषयाक्रियाजन्यतामात्रेणातदीयत्वप्रतीत्व

पपत्तेः व्रीह्यादिषु शक्तिकल्पनायां प्रमाणाभावात् तस्मान्न शक्ति
सद्भावे प्रमाणमस्ति। ननु यथा प्रभुक्तलीलावतीकारेण विवादाध्यासि
तं तन्तिजरूपमात्रं सर्वं प्रातीन्द्रियसापेक्षं प्रमाणेन तत्र यत्नानुपलभ्यमान
त्वात् यत्प्रमाणेन यथा नोपलभ्यते तत्तेन तथाभूतं यथा नीलं पीतरू
पमिति अत्र तन्तिजरूपमात्रं सर्वं प्रत्यक्षताद्विषयरसयोगादेर्व्यावृत्तिः
क्रियत इति अत्रोच्यते नैतावता शक्तौ प्रमाणाभावः यस्मात् परस्य
शक्तिर्विविधा सर्वार्थाभावशङ्कायाः। इति श्रुतिस्मृतिभिः शक्तिः
केनाभिधीयते न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृ
श्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ते ध्या
नयोगानुगतास्त्वपश्यन्देवात्मशक्तिंगुणैर्निगूढां यएकोऽवर्णोबहुधाशक्तियो
स्वै

गाः शक्तयः सर्वभावानामचिंत्यज्ञानगोचराः॥ यतोतो ब्रह्मणस्तास्तु सर्गाद्याः प्रदीपि-
भावशक्तयः सर्वज्ञात्वात्मग्निरत्नादिवो धः स्वतंत्रत्वान्नित्यमलुप्तशक्तिः
अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्येत्यादिश्रुतिस्मृ-
तिपुराणैर्गीयमानायाः शक्तेः प्रकृतेः कथमप्रकृतित्वम् न चैतानि वाक्यानि सत्त्व
रूपसहकारिमात्रप्रतिपादकानि॰ कार्यकरणादिसहकारि [illegible]
रः स्वतंत्रस्याः शक्तेः प्रतिपादनात् नवस्वरूपमात्रापि शक्तेः परास्येत्यादिव
स्याः स्वरूपातिरिक्तत्वप्रतिपादनात् अस्य शक्तिर्विविधातृत्वप्रति
यश्रुतिवचनानांचैतत्स्वरूपमात्रा या एको रूपब्रह्मवासंभवात्॰ नवासोक्त एता
त्रिस्मृतिनामपर्वा देव उपक्रमोपसंहारादिलिंगैः स्ववस्तुस्वरूपपरता
ध्यवसायात् नैयायिकादिभिरतासामेव स्वरूपपरत्वात्मकपग
म्य

माधः अप्येवमर्थापत्त्यनुमाने विना नार्किकमन्यस्ताख्यातिभवात्
तदार्थापत्त्यनुमानोपन्यासे न भवतं परास्तोऽस्यामः अथाहि॰ स्फोट
दिकार्यान्यथानुपपत्तिलक्षणायाः ह्यैवार्थापत्तिः न ज्ञानत्वा प्रकादित्वेवा
न्यथानुपपत्तिः प्रतिबंधकाभावस्य हेतुत्वादेव द्विस्वरूपात्कार्योत्प
त्तेः न च प्रागभावप्रध्वंसाभावादिविकल्पेनाभावस्याकारणत्वं प्रसक्ता
वापत्तिप्रसंगस्य कल्पत्वादभावाविकं धायाएव प्रागभावः कारणत्वादिति
चेन्मैवम् विकल्पासहत्वात् तथाहि यदि प्रतिबंधकाभावः का
रणं न स्यात्तस्याप्यर्हे प्रतिकारिणीकारणमिति प्रतिकूलतर्कमात्राद्वि
द भवति च प्रातिः कारणं ततः प्रतिबंधाभावोऽपि कारणमिति विप
र्ययपर्यवसानाऽभावस्य कारणत्वासाधकं वा नाघः तर्कमात्रस्यो

 पालंभानंगत्वात् । नेतरदंभावतिच शक्तिः कारणमिति विपर्ययस्य श
क्तिमतिरष्टतावच्छेदकत्वात् नचपरासिद्धेन परस्यानिष्टापादनं
प्रामित प्रतियोगिक निषेधवाधितः शक्तिरपि कारणं तदभावेपि त्वे
वं विघातिबंधस्यासिद्धेः तथापि जल्पकथायामव धीय्य प्रतिबंधका
भावस्याकारणत्वे प्रतिबद्धापि शक्तिः किमिति कार्यं न जनयेदिति
स्वहृच्छाबलेन पृच्छतः किं कुत्तराभीति चेत् श्रूयतां तर्हि दर्शनरहस्यं स
ति पुष्कलकारणे कार्योत्पादविरोधि प्रतिबंधकमिति नहि शक्ति
वाधितः तेन तत्सामग्रीवैकल्यात् न कार्य्यपत्ति दयः किंतु विरोधि सन्न
धादेव न तु सामग्रीवैकल्यमेव प्रतिबंधो लोकप्रसिद्धविरोधात् । कु
सूलनिहितबीजानादितिपवनपापरत्नः संसर्गविरहितानितांत

वोवामंजूषान्तोहिता स्तूरी वेमकार्वैदादिविरहिण: प्रातिबन्धा इतिप्रति
यंति लौकिका:सामग्रीविधुरत्वाभावस्यैव प्रतिबंधतायांसमस्त्वर
स्यापिहेतुज्ञानस्यप्रतिबंधाभावत्वयेवोपलक्षणत्वादिदमस्यकारण का
मयंचप्रतिबंधाभावइति परीक्षकाणांविधाविधारणमेवनस्यार
त्र अभावस्याकारणत्वेकार्येणान्वयव्यतिरेकाविरोध इति चेन्न
मेवंमन्यथासिद्धत्वात् अनन्यथासिद्धान्वयव्यतिरेकौकारण
कृप्तिकर्वा तु इतिन्यायात् तर्हि उपलब्धेरभावोपलंभहेतुत्वानवेत विरोधि भा
न्याभावोपलब्धेरभावत्वयात दन्वयव्यतिरेकयोरप्यन्यथासिद्धिकृतकरत्वा
दितिचेन्न तद्व्यतिरेकेऽप्यभावोपलंभकारणानिरूपणात् इन्द्रियमेवका
रणमितिचेन्न तस्याभावेनसन्निकर्षासंभवात् संयोगसमवायय
वी

प्र.कु. तत्राभावात् । विशेषणविशेष्यभावस्य च संबंधांतरगर्भस्यैव प्रत्यक्षांगत्वात् प्रतीपि-
१०३ त्व । तत्र त्वाभावस्य प्रत्यक्षागमत्वं । किं तु फलाद्विगम्यते वा नानिश्चीयते । प्रत्य-
त्यक्षायं पर्वतो वन्हिमानिति यत्र वन्हेरपि संयुक्तविशेषणतया प्रत्यक्षत्व-
107 प्रसंगात् । तत्र च समप्रत्यक्षे वाभावस्यानुपलब्ध्या यथा घटत्वमत्रेति न प्रतीतिरिंद्रिया-
न्वयव्यतिरेकानुविधायित्वेनापरोक्षत्वाज्ज्ञप्तिकरणाभावाद्वेति चेत् । मैवम् ।
अयोगिप्रत्यक्षप्रमितावींद्रियाणां सर्वत्रार्थस्य हेतुत्वनियमस्यानिराकर्तुम-
शक्यत्वादभावप्रतीतिरपरोक्षत्वस्यासिद्धत्वादिंद्रियान्वयव्यतिरेकयोर-
धिकरणग्रहणमात्रोपक्षीणतयान्यथासिद्धत्वाच्च । तत्राधिकरण-
ग्रहणमात्रोपक्षीणत्वमन्वयव्यतिरेकयोरयुक्तमंधस्य त्वगिन्द्रियेणापि ए-
तानि घटादेरूपाभावप्रतीतिप्रसंगात् । अधिकरणस्यागृहीतत्वादिंद्रिय

स्यचाभावग्राहकत्वात्. तस्माद्घटस्यप्रतियोगिग्राहकेंद्रियाभावादेव रू-
पाभावप्रतीत्यनुदय इतिवाच्यं. तथाप्यभावस्यैन्द्रियकत्वासिद्धेरिति चेन्मै-
वम् अभावस्यप्रतियोगिग्राहकेंद्रियग्राह्यत्वमतंत्रं यत घटस्यापि मेकी-
दौघटतद्रूपाद्यभावस्यचाक्षुषत्वं किंनस्यात्. ननुतत्रप्रतियोगितद्या-
क्षुषत्वेप्यधिकरणस्याचाक्षुषत्वान्नतद्रूपाभावस्याचाक्षुषत्वमितिचे-
न्न एवंतर्हि भित्तौपीतस्यघटस्यत्वागिंद्रियघटितेघटादौरूपाभावग्र-
हीतिः प्रतियोगिग्राहकेणाधिकरणस्यग्रहादेरसंभवात् तर्हि श्र-
वणगोचरकुड्मादौवायौवाचाक्षुषेणघटस्यरूपस्पर्शाभावः प्र-
त्यक्षोनस्यादितिचेत् मास्तु तत्रप्रमाणान्तरवेद्यत्वेपित्तव्यवह-
राविरोधात् नचसर्वत्रषष्ठप्रमाणावाधिनातदनुपलब्धिगम्यए

प्र॰ कृ॰ वाभाव इति नियमः व्यापकाभावो व्याप्याभावस्य कारणाभावेन का प्रदीपि॰
१०४ र्याभावस्य वानुमेयत्वांगीकारात् उक्तं हि भट्टपादैः नियम्यत्वनिय
104 न्तृत्वे भावयोर्यादृशी मते विपरीते प्रतीयेते ते एव तदभावयोरिति
तथा च ब्रह्मसिद्धौ मण्डनमिश्रैर्विपर्ययाभाव उक्तः कुतोऽनुमानं हे
त्वभावे फलाभाव इति । तस्मादनुपलब्धेरन्वयव्यतिरेकाभ्यां व्यति
रेकबलादभावप्रतीतिर्हेतुत्वानुपलब्धिविशेषेऽवसीयते प्रकृते
वस्तुपुष्कलकारणादेव कार्योत्पत्त्युपपत्तौ न प्रतिबंधकाभावस्य
कारणता अन्यथात्वाश्रयत्वाच्चास्य मते दुर्वारा यद्यपि मण्यादेः
कार्यप्रतिकूलत्वेनान्वयव्यतिरेकाववसेयम् तथापि विशामग्रीरूपे
तालक्षण्यादिदं प्रतिबंधकत्वं तत्तदीयाभावस्य सामग्र्यंतर्भावविवक्षा

ज्ञान

त्साधेदं प्रतिबंधो विसामग्रीत्वंगीकारात् नैतत्प्रतिबंधकत्वं विसा
मग्रीत्वयोरन्योन्यापेक्षयैवाधिगतिरिति परस्पराश्रयतापत्यंतस्या
त्र नन्वमरण्याद्यभावस्य सामग्र्यंतर्भावस्त्वेपेक्षामस्तु नाममरण्या त्व
दे विसामग्रीत्वं ज्ञानंतत्प्रापितदभावस्यान्वयव्यतिरेकाभ्यामेवचाहि
स्वरूपवत्सामग्र्यंतर्भावो ज्ञानयोरन्योन्याश्रयः नैवम् विकल्पासहत्वा
त्र तथाहि किं मरण्याद्यभावाः प्रत्येकमन्वयव्यतिरेकाभ्यां कार
णतयावसीयंते अथवा प्रतिबंधाभावत्वोपाधिना क्रोडीकृ
ताः नाद्यः मरण्याद्यभावानामनंतानामुपसंग्राहकं विना प्रत्ये
कमन्वयव्यतिरेकाध्यवसानस्य पुरुषायुषेणाप्यशक्यत्वात् ना
पि द्वितीयः तथा सति विसामग्रीलक्षणस्य प्रतिबंधत्वानधीनप्रतिबंधाभा

प्र॰ कु॰ १०५ वत्वोपाधिज्ञानमंतरेणमण्याद्यभावानांसामर्थ्यंतभविस्यदुराधिगमत्वया। प्रदीपि॰

105

न्योन्याश्रयतायादुरुत्तरत्वात् नचशक्तिपक्षेप्रतिबंधासंभवः शक्तिमत

भ्युपगच्छतामिवाभ्युपगच्छतामपिकारणतांकार्योत्पादसिन्व्यस्यैवप्रा

तिबंधतोपपत्तेः वैसाम्यस्यप्रतिबंधस्यौदीरितरीत्यानिरस्तत्वात्॰

अतःप्रतिबंधाभावस्यकारणत्वासंभवात् कार्याप्यीपपत्तेरन्यथोपप

त्तिः उपादानोपादेयभावनियमानुपपत्तिरपिशक्तौप्रमाणमेव॰ न

तत्तत्स्वभावभेदादेवोपपत्तेरन्यथोपपत्तिरशक्तेरितिचेत् मैवम् तथा

सतिसर्वत्रस्वभाववादपादप्रसारिकयासामान्यसमवायविशेषादेरपिपरा

कृतप्रसंगात् तथाहि॰ सत्तायांस्वभावभेदादेवसदितिव्यवहारवद्द्रव्या

दिष्वपिसद्व्यवहारोपपत्तौसत्तासामान्यापलापःप्रसज्येत॰ एकसमवाय

वानयं पटहत्वादावि वसंबंधमंतरेणैपि गुणत्वकर्मादेर्विशिष्टकरणत्वोपपत्तौ सं
मवायापह्नवः स्यात् विशेषणतांविना धर्मंतरेणैव व्याख्यानव्यवहारे हि
तत्ववद्यानित्यद्रव्याणामपि स्वभावभेदादेव तथात्वोपपत्तौ विशेषपद
दार्थपरिकल्पनाप्रसंगः यद्यपवत्र यत्र प्रमाणमस्ति तत्र तत्त्ववत्त्वं तत्र राधी
नस्तु व्यवहारः यत्र तु नत्वमास्ति तत्र स्वभावभेदादेव व्यवहार इति चेत् वस्त्वेत
वेत् हंतैवमत्रापि प्रमाणसद्भावादेव स्वरूपातिरेकिणी प्राकृतिः यी
कियतां तत्र स्वभाववादपादवलंबनकातरतयेत्यलमतिविस्तरेण
अनुमानमपि तत्र प्रमाणं तथा हि स्थितस्थापकधर्मवानीहि हि =
यादिरूपसंश्रयः रहितो गुणयोगित्वाद् गुणत्वाश्रयकं भवत्रयतिराधि
कानीहियास्थितस्थापकेतरस्मावाश्रयः गुणवत्त्वात् घटवत् न चैष
रवादितामतीहियत्वं प्रसिद्धम् प्रमाणागतरूपनाताविशेषवारण

प्र.कृ. तालंबनानुव्यवसायेनतदास्म्यादादित्यव्वाविषयत्वस्यातींद्रियग्राह्या । प्रदीपि.
१०६ र्यस्य गुरुत्वादेर्भावनादौ वप्रसिद्धत्वात् । गुरुत्वधर्म धर्मभावनाः ॥ अ
तींद्रिया श्रुतिप्रशस्तपादैरुक्तत्वात् । ननु किमिहाश्रयग्राह्येनाधार
106 त्वमात्रं विवक्षितमुत तत्समवायित्वं । नाद्यः वक्रैकदावित्परमाएवा
धारत्वसंभवेनासिद्धसाधनत्वात् । नापिद्वितीयः समवायमति
ष्ठतोभावस्याप्रसिद्धविशेषणत्वादितिचेत् मैवम् समवायानंगी
दी कारेपि स्वीयरूपातामेवाश्रुतासिद्ध तथा वक्रोविशेष धर्मी धर्मत्वस्या
श्रयग्राह्येनाविवादितत्वात् । नचातींद्रियकर्माश्रयत्वेन मीमांसक
स्यार्थांतरता शक्तिवादिनोरपि प्राभाकरवज्ञाह्यवेदांतिनोः कर्मा
तींद्रियत्वस्यासिद्धत्वात् विपक्षेवंवान्हिस्य रूपस्येवकारणत्वात्तर

त्तिवं धकाभावकारणत्वस्य गुरुत्वान्निरस्तत्वात् मंत्रादिसमवधाना
समवधानयोरविशेषेण कार्यजननप्रसंगो बाधः नचैवंविधध
र्मी श्रयत्वे गुणकर्मादावपि द्रव्यत्वप्रसंगः तेषां गुणानाधिकरण
त्वात् नचैवंविधधर्माश्रयत्वाद्गुणाधिकरणत्वमपि स्यादिति वा
च्यं प्रसंगस्य विपर्ययापर्यवसायित्वात् नहि यद्गुणानधिकरणं
तदेवंविधधर्माधिकरणं न भवतीति प्रतिवादिसंप्रतिपन्नमुदा
हरणमस्ति येनायं प्रसंगो विपर्ययपर्यवसायी स्यात् प्राक्तिव्यतिर
रेकस्य स्वसंदिग्धपक्षकोटिनिक्षिप्त न द्वितीयानुमानेपि मायुर
वादिनं प्रतिनिष्ठकारणकत्वेनासिद्धसाधनता तस्योभयवादिस
मतकारणातिरिक्तत्वाभावादीश्वरकारणत्वद्वयवेदतिमिरस्फूपग
त्वा
मात

प्र॰कु॰
१०७

107

जन्यत्व

न

जन्यभावृत्तिविशेषणांतरप्रक्षेपेण मार्दुस्यापि सिद्धसाधर्म्यपरिहारसंभवात् प्रदीपि॰
त्। न चैवं सति नित्यविभुशक्तयभावप्रसंगः नित्यविभुशक्तिसिद्धौ न दृष्टांता
वष्टंभनित्यत्वविनिश्चायकत्वासिद्धेः सलिलपरमाणुरूपादेवानित्यविभुत्वस्या
नित्यत्वोपपत्तेः श्रीहीन्प्रोक्षतीत्यादि द्वितीया प्रकृतिभिश्चव्रीह्या
दिवृत्तीदृष्टशक्तिसद्भावासिद्धेः न वादृष्टस्य चेतनधर्मस्याचेतने
व्रीह्यादिष्वसंभवात्। नापि चव्रीक्रियाजन्यतामात्रेण तदीयत्वप्रती
त्युपपत्तेश्च द्वितीया प्रकृतिर्गौणीति वाच्यं। धर्माधर्मलक्षणादृष्ट
विलक्षणस्यैवकस्याविदतिशयस्य तंडुलापि ष्टपुरोडाशादिपरंपरया
प्रधानापूर्वजननसामर्थ्यापरनामधेयस्याभ्युपगमात्। अन्यथा
स्वरूपेणव्रीह्यादीनां तत्साधनत्वे प्रोक्षणादिविधानवैयर्थ्यप्रसंगा

ग

हेतोर

हृदस्यासंभविवाहृदस्यैवकल्पनीयत्वात्· संभवतिचमुख्येलक्षणा
प्रयत्नास्यानवकाशत्वात् एतेनलीलावतीकारस्यापिनिराकृतः प्र
योगः प्रमाणान्तरागम्यार्थापत्त्यनुमानान्तार्थापत्तित्वेनप्रमाणेना
नुपलब्धेःप्रान्तस्मादित्तिसिद्धेः तदेवमर्थप्रत्यायनशक्तिसद्भावात्पदा
नांतदभिहितेभ्यःपदार्थेभ्यःसन्निधानादिसहकारिवशात्पदार्था
नामन्योन्यान्वयप्रतिपत्तिर्लक्षणयाविधीयतेतिसिद्धं १२ ननुप
दानामेवान्योन्यान्वितस्वार्थाभिधायकत्वसंभवेकिमितिपदार्था
नांलक्षणयान्योन्यान्वयप्रतिपत्तिजनकत्वमास्थीयते· तथा
हि योग्यतरासत्तिमत्स्वार्थेषुपदानामाकांक्षादर्शनात्तत्रैवसा
मर्थ्यमध्यवसीयते· यद्यपिप्रातिप्रयोगंविशेषान्तरतन्त्संसर्गयोर्व

प्र·कृ· भिचारस्तथापि योग्येतरान्वितस्वार्थमात्रस्याव्यभिचारात्तस्यैवावगत प्रदीपि·
१·८ योग्येतरान्वितस्वार्थाभिधानसामर्थ्यानुसारेण प्रयोगान्तरेष्वपि तत्वे
वकल्पयिष्यते ननु किमनाभिहितेन पदार्थेनान्वितं स्वार्थमववोध
जा यति पदमुत पदान्तराभिहितेन · नाद्यः एकस्मादेव पदात्तदर्थान्वि
तस्वार्थावबोधसंभवे तत्पदान्तरस्य वैयर्थ्यप्रसंगात् · न द्वितीयः
परस्पराश्रयप्रसंगात् · तथाहि गामानयेत्यत्र गोपदं यावदानय
गो पदेन पदार्थान्वितस्वार्थेनाभिधीयेत न तावत्तदन्वितस्वार्थमभि
धातुमर्हति एवं तदपि पदं यावत्स्वार्थान्वितमर्थं गोपदं नाभि
दध्यात्तावत्तदन्वितस्वार्थं नाभिधत्ते ततश्च गोपदं तदन्वितस्वा
र्थमभिहितं पश्चादानयपदेन तदन्वितस्वार्थोऽभिधातव्य इति च

दे॰ २

तास्मिन्नोपदेन स्वार्थोऽभिधातव्य इति व्यक्तमेव परस्परसाश्रयत्वं ।
पदार्थमात्राभिधानपूर्वकं तु तदन्विताभिधाने द्विरभिधानमप्र-
माणा मनुपपद्यमानं चापद्येत ननु द्विरभिधानं पदजातस्य
साहचर्यवशात्स्वार्थेभिधायं स्मारकतां पश्चादन्विताभिधा- एवं
यकत्वाभ्युपगमादिति चेन्मैवं साहचर्यदर्शनदशायामन्विता-
तामेवानुभूततया तत्रैव स्मरणस्यावश्याश्रयणीयत्वात् ।
नहि पदं पदार्थमात्रप्रतिपत्तये प्रयुज्यते किन्तु व्यवहाराय स चान्वि-
तस्यैवेति कथमनन्वितामेव पदार्थानां पदेभ्यः स्मृतिः स्यात् न
चावगां पश्येति प्रयोगे गोपदेन पूर्वानुभूतानयनान्वितस्वार्थस्य
स्मारितत्वात्पश्येति पदं अनाकांक्षितार्थमसंगतं प्रसज्येत ए
ता

प्र॰ कृ॰ १०९

109

वं प्रासादं पश्येत्यत्र प्रासादान्वितस्यार्थाभिधायकत्वात्पश्येतिप प्रदीपि
दस्य तगोपदं तेन संबध्येत तस्याश्च वाक्यार्थः कापि परिनिष्ठितो
नास्ति ध्येत॰ न त्वव्यभिचारात्रोपदं स्वार्थमात्रमेव स्मारयति ता
र्यातस्याणि तेषां व्यभिचारित्वादिति चेन्न मेवं पदृभ्यासादर
प्रत्यये साहित्ताय संभावनायाः प्रबोधवत्याः स्मरणहेतुत्वांगीकारा
त्॰ तत्र प्रबोधस्य च व्यभिचारिण्यपर्यातेः परिगुणितप्रणिधानसाहचर्या
दिजन्मतो विशेषात्॰ परिणामित्वाहि स्मृतेर्हेतवः प्रणिधानाभ्यासलि
गलक्षणसादृश्यपरिग्रहाश्रिताश्रयसंबंधानंतर्यवियोगैककार्यविरो
धातिशयप्राप्तिव्यवधानस्सुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागा
धर्माधर्माः प्रामाणिकैः आसत्तिवेद्ययोग्यत्वरान्वयस्यापि साहचर्यस्म

मा
स्मरणहेतुः तस्मात्पदैरभिहिताः पदार्था एवाकांक्षादिमन्तः परस्परान्वयबोधं
न्तीति युक्तमाश्रयितुं मैवं त्वयापि पदस्य विषय... ः प्रत्यक्षाः प्रमाणाव
पर्ययसंशयादिष्वनन्तर्भावात्स्मृतय एष्टव्याः ताश्चान्वितगोचरास्तत्स्वरू
पमात्रगोचराः इति तुल्यो दोषः न च वाच्यमभिधानतः स्मारितमेव वा
क्यार्थान्... नसमाहृत्य र्यमात्रादिति गंगायां घोष इति वसतीत्याद
दौ पदतामभिहिततीरादीनां वाक्यार्थेन्वयप्रसंगात् अभ्यासातिश
यस्य पदार्थस्मरणहेतुः स च यथा पदानां स्वार्थे तथा तत्पदार्थान्तरे पि तेषां व्यभि
चारित्वात् तथा च स्वरूपमात्रगोचरेभ्यः पदेभ्यः स्मारिताः पदार्था आकांक्षा
दिमन्तः पदैरन्विता अभिधीयन्त इति न परस्पराश्रयता नापि पदानां
मानाकांक्षा आकांक्षा हि प्रतिपत्तुर्जिज्ञासा सा चाभिधानापर्यवसाना

पि

प्र॰ कृ॰ दभिहितार्थापर्यवसानान्नाभवति यथा बलवत्स्यत्र प्रातिपदिकार्थमात्रे प्रथमा प्रदीपि॰
११॰ विभक्तिः स्मरणात्तेनैव तस्यान्विताभिधानासंभवादन्यस्यचानविधाना
दभिधानपर्यवसानार्थेवाकांक्षापर्यावा विश्वजितायजेतेत्यत्र कार्य
110 स्यविषयकरणान्वितनया प्रतीतेस्तस्यैवापर्यवसानाद्विधिश्रुत्याधि
कारिकल्पना॰ नैवंभूताकांक्षावशात्पदानामान्विताभिधानवि
रुध्यते॰ नन्वेतस्यापिपदानामन्विताभिधाने सामर्थ्यं न कल्पनीयं प्र
दसाधारितान्नामेवपदार्थानामाकांक्षादिवशादन्योन्यान्वयप्रत्या
यकत्वोपपत्तेरितिचेन्मैवं मानान्तरसाधितानां पदार्थानां वाक्यार्थ
प्रत्यायकत्वादर्शनात् नतु पश्यतः श्वेतिमारूपं हेषाशब्दं च पश्चात्
तः खुरनिक्षेपशब्दं च श्वेतोश्वो धावतीति धीरिति॰ चायादस्त्येव प

रा दार्थानां संसर्गबोधजनकत्वमिति चेन्न अनुमानादर्थापत्ते
र्वा तद्वत्संसर्गावगमात् तथाहि येषां पदार्थानामेकाधिकरणतया
अवगतानां प्रत्यायकत्वेऽनुमानानतिरेकः विपक्षकलितावगतानां
चार्थानां भावोपपत्तिरेव परिशिष्यते । अनिश्चितत्वे त्वनध्य
वसाय एव । अपिच । शब्दसामर्थ्यजन्यत्वे वाक्यार्थप्रत्ययस्य प
दार्थस्येव सत्यत्वसम्प्रमाण्यमप्युपपद्येत स्यात् प्रमत्तादिवाक्यस्यानंत
भावात् । किंच पदार्थानामनभिहितानां संसर्गबोधकत्वाभावादभि
हितानामेव तत्प्रत्ययः । तथाच पदार्थानां संसर्गप्रत्ययजनकसा
मर्थ्यं पदानां च पदार्थेषु तत्सामर्थ्याधानसामर्थ्यमिति द्वयं क
ल्पनीयमिति कल्पनागौरवमभिहितान्वयवादिनः अन्विता

प्र॰ क्र॰ २११ भिधानवादिनस्तु पदानां योग्येतरान्वितस्वार्थाभिधानसामर्थ्यं प्रदीपि॰
मेकमेव कल्पनीयमिति कल्पनालाघवमित्ययमेव पक्षः श्रेयानिति
अन्विताभिहितान्वयवादिनः प्रत्यवतिष्ठन्ते विनाभिधेयस्मरणं
मन्वयाप्रतिपत्तिः तेन तत्पदार्थस्मृतयस्तेषामन्वयबोधकाः
पदकदंबकश्रवणसमनंतरस्मारिकताश्चिन्मानसापराधादनुप
जातिपदार्थस्मृतेर्वाक्यार्थप्रत्ययानुदयाद् उदयाद्वोपजातपर
दार्थस्मृतेरन्वयव्यतिरेकाभ्यां पदार्थस्मृतीनां वाक्यार्थप्रत्य
यहेतुत्वं तावदवसीयते न च पदार्थस्वरूपमात्रं वि[illegible]यस्मृती व
नामन्यथान्यथान्वयबोधकत्वमनुपपन्नमन्यत्रादृष्टत्वादिति वाच्यं
स्मरणमात्रस्य सामर्थ्याभावेऽपि समभिव्याहृतपदकदंबकसम्

पजनितपदार्थस्मृतीनामाकांक्षादिसहकारिणीनां संभवात्के
वलबोधकत्वं सहकारिभेदोपाधानात् कथमन्यथा संस्कारे द्वि
ययोरन्यत्र परस्परसंगतार्थविषययोः प्रत्यभिज्ञायां पूर्वापरद
शाकालसंसृष्टैकवस्तुबोधकत्वं परस्परसहकारित्वया तेषामुत्व
त्पत्तावपितुल्यं नच पदार्थस्मृतीनां स्मृतानां वा पदार्थानामन्व
यबोधकत्वे शब्दस्य प्रमाणान्तरत्वप्रसंगः लिंगप्रकरणस्थाना
नामिव शाब्दप्रमाणान्तर्भावोपपत्तेः ननु लिंगादिष्वप्यापत्तिकल्प
यित्वैव विनियोगप्रतीतेः स्वीकाराच्छाब्दत्वं नाविरुध्यते इह तु पदा
र्थस्मृतीनां स्मृतानां वा पदार्थानामन्वयबोधकत्वमितिवैषम्यं
शब्दावगतपदार्थजन्यत्वेनान्वयप्रतीतेः शाब्दत्वे चवक्तावगत

प्र·कृ·
११२
112

धूमजन्यस्यापिवह्निज्ञानस्यचाक्षुषत्वप्रसंगइतिचेन्न नैवमन्वयप्रतीतिं प्रदीपि-
जनयतांपदानामवांतरव्यापारत्वात्पदार्थस्मरणानां नचस्वव्याप-
रव्यवधानाद्व्यापारवतःकरणत्वंविहन्यते · प्राणादीनामस्वव्यवधा-
नेनफलसाधकानामकरणत्वप्रसंगात् · नचचक्षुषोलिंगज्ञान-
मवांतरव्यापारः अगृहीताविनाभावस्यानुमानानुदयाच्चाक्षुषस्थलेपि
लिंगस्यबोधकत्वात् · गुरुमतानुसारिभिरपिलिंगप्रकरणादीनांमंत्ररेणो
वघ्नातिकल्पनांविनियोजकानांशब्दप्रमाणांतर्भावाभ्युपगमात् · ननु
त्वयाप्यभिहितान्वयवादेतिस्रःशक्तयःकल्पनीयाःपदानांतावदर्थ-
स्वरूपानुभवजननशक्तिरर्थानांचान्योन्यान्वयप्रत्यायनशक्तिस्त-
दाधानशक्तिर्व्यापारापदानामिति · पदानांसाहचर्येणार्थस्मारकत्वा-
पुनःशक्तिद्वयंकल्पनीयं · पदार्थानामन्वयबोधनशक्तिस्तेषुतदाधा-

ना

र्थशक्तिश्चपदानां अन्विताभिधानेतुपदानामन्योन्यान्वितस्वार्थाभि
धानशक्तिरेकैवेतिकल्पनालाघवमितिचेन्न मैवं त्वयाप्यर्थान्तरेतत्ता
दन्वयेस्वार्थेचपदशक्तीनांकल्पनीयत्वात्. नवार्थान्तरान्वितस्वा
र्थाभिधायकमपिपदंस्वार्थस्यैववाचकंनार्थान्तरतदन्वययोर्जातिवा
चकमपिपदंव्यक्तितदन्वययोरिवेतिवाच्यं विकल्पासहत्वात् तथाहि. कि
जातिवाचकपदेनव्यक्तेरिवलक्ष्यत्वमर्थान्तरतदन्वययोस्तत्ववाचत्वं. ना
द्य: पदानामन्विताभिधानभङ्गप्रसङ्गात् नाद्वितीय: वाच्यत्वेतयो
रपिशक्तेरवश्यकल्पनीयतयागौरवस्यतादवस्थ्यात् किंचैकैकस्य
पदस्यप्रत्येकमाणस्यसमर्थमाणस्यवान्तत्पदार्थस्मरणजननतथाभि
धानरेकस्मिन्रणगोचराणांचतेषामेवपदानामन्योन्यान्वितपदार्थाभि

प्र.कृ.
११३
113

धानशक्तिः सकलपदगोचरस्य स्मरणस्य पदेष्वन्वितामिधानशक्तयाधा प्रदीपि
नशक्तिभ्रमतिश्च शक्तिद्वयकल्पनान्वितामिधानवदेपि तुल्या नचामि
हितान्वयेपि शक्तिकल्पनागौरवस्य तुल्यत्वाद्विनिगमनाभावश्चा
शंकनीयः विशिष्टार्थप्रत्यायनप्रयुक्तपदकदंबकसमभिव्याहा
रान्यथानुपपत्त्या पदस्मारितानामन्वितामन्वयोग्यान्वयपरत्वलक्षणमा
त्रावेनोपपत्तेः शक्तेरकल्पनीयत्वादनन्यलभ्यः शब्दार्थ इति न्याया
यार उक्तं च विशिष्टार्थप्रयुक्ताहि समभिव्याहृतिर्जन इति न
नन्वेवं लक्षणाभवितुमर्हति तल्लक्षणाभावात् तथाहि वाच्यस्या
र्थस्य वाक्यार्थे संबंधानुपपत्तिः तत्संबंधवशात्प्राप्तस्यान्यस्य
लक्षणेत्यतः इति नचौदनं चैत्रः पचति पीठर इत्यादौ चैत्रापिठरादी

नामर्थानां वाक्यार्थसंबंधानुपपत्तिः न च पदार्थैर्लक्षिताः पदार्था नामान्वि-
तावस्थायाः पुनरन्वयांतरस्यालक्षितत्वेनैयं न लक्षणस्यात् लक्षणविरहादिति
चेन्न मेवमव्यापकत्वादेतस्य लक्षणलक्षणत्वासंभवात्। न हि विषं भुंक्ष्व
श्रि इत्यादौ चेन्न लक्षणमस्ति। तत्र सर्वेषां पदानां लक्षकत्वेन वाक्यार्थाभावात्। व्या=
वाच्यार्थाविनाभूतस्य वाक्यार्थेन पुनरन्वयाभावाच्च यदपि मतांतर
विशेषेण तु मुख्यार्थस्य परित्यागे मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणो
च्यत इति लक्षणलक्षणं तदव्यापकम् कुंडपायिनामयनमासमग्निहो
त्रं जुहोतीत्यत्र लक्षणाव्यापकत्वात्। उपसद्भिश्चरित्वा मासमग्निहोत्रं
जुहोतीति श्रूयमाणत्वात् प्रसिद्धाग्निहोत्रे चोपसदामभावात् कर्मांतरस्या
ग्निहोत्रशब्दः प्रसिद्धाग्निहोत्रसाधर्म्यलक्षणया वर्तते। न च तत्र मा[illegible]

प्र.कु.
११४

114

त्रैविशेषस्तदर्थस्यमानांतरागोचरत्वात् तस्मात्पदानांपदार्थस्यप्रदीप-
रूपमात्रपरत्वेवाक्यप्रमाण्यानुपपत्तिरेवलक्षणाक्षेपिकेतितदेव
लक्षणांलक्षणायाः सर्वलौकिकवैदिकलक्षणानांव्यापकत्वात्
त् तथाहि॰गंगायांघोषःप्रतिवसत्यादित्योयूपःकुंडपापिनाम
यतेमासमग्निहोत्रंजुहुतीत्यादावास्तिपदार्थमात्रपरत्वेवाक्यप्रा
माण्यानुपपत्तिः ननुतत्रवाच्यार्थान्वयानुपपत्तिरस्यास्तितत्क
थमिदमेवलक्षणामितिनियम्यतइतिचेत् ॰मैव वाच्यार्थान्व
यानुपपत्त्यभावेपिलौकिकवैदयोर्लक्षणादर्शनात् ॰तथाहि लौ
के॰स्ववर्णपुष्पांपृथिवींचिन्वंतिपुरुषास्त्रयः शूरश्चकृतविद्यश्च
याभिजानातिसेवितुं इत्यादौपदार्थानामन्वयसंभवेपितेषा

योजकेतात्पर्यासंभवेनवाक्यप्रामाण्यानुपपत्तेः प्रतीयमानवाक्या
र्थहिंस्यात्सर्वादित्वंसंपदोहेतुरिति धृतिनास्वीक्रियते· तथाचवेदेवाः
पूर्वैर्द्वेपिष्ठुत्यादौसंभवत्येववाक्यार्थान्वयेकैमर्थ्यकवशेनदेवता
ल प्राशस्त्यकल्पनायाकार्यःप्रशस्त्यलक्षणे· तस्माद्वाक्यप्रामाण्यानु
पपत्तिरेवलक्षणान्तोपिकेतिनिश्चितं मम: शक्तिचेहापिलोकानुसा
रेणविधिस्वार्थप्रत्यायनप्रयुक्तसमभिव्याहृतानामर्थमात्रप
रत्वेपदानांप्रामाण्यानुपपत्तिः विधिस्वार्थप्रयुक्ताहिसमभिव्याह
तिर्जनितधृतिन्यायात्· शक्तिवशब्दानामर्थस्वरूपसंबंधवशाभिर
त्वितावस्थायांच तथाचार्थस्वरूपबोधनसामर्थ्यातिशयाधिकसामर्थ्य
कल्पनायापि ननुपदानांसंस्कारोत्मैवमात्रोपयोगान्नाभिधायात्

प्र॰ क॰ ११५ त्वं॰पदार्थानामपिस्ववाचकपदसंस्कारोत्मेवकारणंतत्स्मारकत्वमपि प्रतीति॰
धायकत्वप्रसंगादितिचेन्न पदानामेवपदार्थस्मरणाभिधायकत्व२
स्यलौकिकपरीक्षप्रसिद्धिसिद्धस्यातिवारणीयत्वात्॰ शब्दविषयावि
ज्ञानस्यैवपदार्थस्मरणजननशक्त्युपहितस्याभिधाव्यापार 'त्वेनस्वी
कारात्॰ अन्यस्यचपरिस्पन्दप्रयत्नलक्षणस्यव्यापारस्याविभौति-
-णेवाश्रुं देवेनतत्यामताधिकरणेडुतिरूपत्वात्॰ तस्मात्समभिव्याह
तपदकदंबकस्मारितपदार्थानांपरस्परान्वयप्रत्ययोलाक्षणिकः
शाब्दश्चेतिसर्वमवदातं तथाचोक्तंमीमांसावार्त्तिककारमिश्रैः
नाविज्ञंचातिसाम्यर्थवाक्यार्थापिपदानिनः वाक्यार्थोलक्षणा
णाहिसर्वत्रैवेतिचास्थितिरिति प्रयोगश्च॰शाब्दीतात्पर्यविषय

यान्निषंगस्यलक्षकाः तत्तात्पर्याभिधानत्वात् · द्वेलंभुंक्ष्वेतिप्र
द्रुवत् विवादपदानिपदानिलक्षणापदार्थतामत्योन्यात्वयप्रु
तिपत्तिपराणिऽन्वितप्रतिपत्तिपरत्वेसतिपदत्वात् विषंभुंक्ष्वे
तिपदकंदर्भकवत् नचपदानिस्वार्थपरित्यागेनलक्षणयात्वय
प्रतिपत्तिपराणिउक्तसाधनस्यात्त्वदुदाहृतवाक्यवादित्याभास
समानयोगक्षेमता अस्यैवत्वदुदाहृतानुमानवाक्यस्यस्वार्थप
रित्यागापरित्यागयोः तदनुपपत्तेः नद्याहि स्वार्थपरित्यागेवि
शिष्टसाध्यप्रतीत्यभावाद्धेत्वाविघातकत्वात् अपरित्यागेवा
तत्रैवानैकांतिकत्वात् मुख्यार्थेबाधोपाधिप्रयुक्तत्वाच्चस्वार्थ
परित्यागस्य · इहचबाधाभावान्नस्वार्थपरित्यागानुमानं · तस्माद्

प्र·कु·
११६
116

भिहितान्वयवाद एव श्रेयानिति केचिदाचार्याः नचैवमस्मत्सिद्धांतः भा प्रदीपि·
ष्यकारसंमतत्वात् · न च पाचसमन्वयसूत्रे वेदांतवाक्यानि प्रसक्तत्यभा
ष्यकारः प्रतिपादयति स्म न च वतद्रुतानां पदानां ब्रह्मस्वरूपाविषये र्या
निश्चिते समन्वये च गम्यमाने पर्यं नरकल्पना युक्ता श्रुतहान्यश्रु
तकल्पनाप्रसंगात् नत्र च पदार्थानामेवान्योन्यान्वयप्रत्यायकता प्र
तीयते मंडनमिश्रादिभिरप्यंगीकृतत्वात् पदार्थांतरतुल्यत्वा
द्विधाकांक्षादिबंधनः न संसर्गः पदार्थानां स्वप्रावेदकः प्रदर्शितः
संबंधयोग्यरूपेणतस्मात्संबंधभागितः विशिष्टार्थप्रवृत्तानां हि
समभिव्याहृतिर्जिन इति व्यवहारे भट्टनय इत्यंगीकारात् भट्टपादै
श्च वाक्यार्थस्य सर्वत्र लाक्षणिकत्वस्वीकारात् वाक्यार्थेलक्ष्यमाणे

हि सर्वत्रै वेतिवास्यतिरिति तस्मात्पौरुषेयवाक्येभ्य इवापौरुषेयेभ्यो
वेदान्तवाक्येभ्यो लब्धस्यार्थस्य प्रोक्तलक्षणं ब्रह्मास्ति प्रमिति सिद्धं १४
ननु कथमपौरुषेयत्वं वेदान्तानां तत्प्रतिपादकप्रमाणाभावात् न
त्वपौरुषेया वेदाः संप्रदायाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वादात्म
वदित्यनुमानमस्तीति चेत् नैवं विशेषणासिद्धेः पौरुषेयवेद
वादिभिः प्रलये संप्रदायविच्छेदस्याभ्युपगमात् अस्मर्यमाणकर्तृ
कत्वं किमप्रमीयमाणकर्तृकत्वं विवक्षितं उतस्मरणागोचरक
र्तृकत्वं नाद्यः तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे छन्दांसि
जज्ञिरे तस्माद्यजुस्तस्मादजायत त्रयो वेदा अजायन्त ऋग्वेद ए
वाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यादिदं सर्वमसृजत

ऋचोयजूंषिसामानीत्यादिश्रुतिभिः कर्तुः प्रतीयमानत्वात् नापि द्वि प्रदीपि·
तीयः विकल्पासहत्वात्· तथाहि· किमेकेनास्मरणं विवादितं उत सर्वा
स्मरणम् नाद्यः मुक्तक श्लोकादावनैकान्तिकत्वात्· न द्वितीयः स
र्वास्मरणस्यासर्वज्ञाविज्ञानाविषयत्वात्· ननु वाचाविरूपनित्य
याया यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै नाविके
तमुपाख्यानं मृत्युप्रोक्तं सनातनम्· अनादिनिधना नित्या वागुत्सृ
ति· ष्टा स्वयंभुवेत्यादिश्रुतिस्मृतिभ्यो वेदस्य नित्यत्वावगमात्·
पौरुषेयत्वप्रतिपादकानि कल्पान्तेषु संप्रदायप्रवर्तकत्वपराणी
ति चेन्न· मैवं वाचाविरूपनित्ययेत्यस्य स्ववाचकस्य वर्णे चोपदत्वप्रति श्रु
मितिवाक्यशेषाद्विनिवृत्तौ ति विधिपरत्वावगमात्· अन्यथाप्यदर्शन

स्य प्रामाण्याभावे प्रमाणत्वानुपपत्तेः यो वै वेदांश्च प्रहिणोतीत्यस्य च
पौरुषेयत्वापौरुषेयत्वयोः साधारणत्वात् एवं निर्मायापि वेदानां
प्रत्नसंभवात्. मन्त्रप्रोक्तं सनातनामित्यस्य वाक्यस्योक्ता क्र
त्वाच्च मेधावी वहलोके महीयत इति वाक्याद् उपाख्यानानुवचन
प्रवरगृह्यांसापरत्वात्. मृतादिति धर्तानित्यानि स्मृतौ प्रपाति
मन्वन्तरे वेदाः प्रक्रान्तिरन्याविधीयत इति स्मृत्यन्तरे विरोधेतानि
रोचकत्वाद् देवविनित्यत्वप्रतिपादकानामन्यार्थत्यापौरुषेय
त्वप्रतिपादकवाक्याबाधकत्वात्. पौरुषेयत्वमेव वेदानां निश्चि
तम्. अनुमानतोऽपि तत्पात्वम प्यसामो वेदवाक्यानि पौरुषे
याणि वाक्यत्वात् कालिदासवाक्यवत् इति वेदवाक्यान्यात प्रमाणी

प्र.क. नापि प्रमाणत्वे सति वाक्यत्वान्मन्वादिवाक्यवत् ननु वेदस्याध्य- प्रदीपि.
११८ यनं सर्वं गुर्वध्ययनपूर्वकं वेदाध्ययनवाक्यत्वाद् अधुनाध्ययनवच्च
118 इत्यनुमानात्सम्प्रति साधनतेति चेन्न मैवं सर्ववेदाध्ययनप्रतीका-
रे दृष्टान्तासिद्धेः । अतीतकालीनाध्ययनप्रतीकारे बाधान्तासिद्धप्रसा-
धनत्वात् । सर्गकालीनाध्ययनप्रतीकारे सर्गमनंगीकुर्वतां मीमां-
मांसकस्याश्रयासिद्धेः भारताध्ययनं सर्वं गुर्वध्ययनपूर्वकं भा-
स रताध्ययनत्वेन साम्प्रताध्ययनं यथेत्याभाससमानयोगक्षेमत्वात् ।
अपि तु भारतकर्तृस्मरणबाधः कृष्णद्वैपायनं व्यासं विद्धि नारायणं
प्रभुं को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत् नहि इहापि स कर्तृ-
कत्वप्रतिपादकश्रुतिर्विरोध इति समानम् विपक्षे बाधकाभावाप्रमाणे

तत्वाद्युक्तोन्मत्तादिवदप्रामाण्यप्रसंगो बाधकस्तर्कः अथ बालोन्मत्तादि
वाक्यानामनाप्तप्रणीतत्वेनाप्रामाण्यं इह तु तदभावादाप्तवाक्यवत्प्रा
माण्यमुपपद्यत इति चेन्न मैवं अनाप्तप्रणीतवाक्यस्य जगति प्रा
प्तप्रणीतत्वनियमदृष्टेः अन्यथा वक्तुरभावे वाक्यस्योत्पत्ति प्र[illegible]णी=
ण्योरसंभवात् अथाप्याभिव्यक्तिरेव शब्दानां वक्तृव्यापारान्नोत्पत्तिः
मैवं (एवं सति पाषंडाद्यागमानामपि नित्यत्वप्रसंगात् (सर्वदोपलब्ध्या
नुपलब्धिप्रसंगश्च) किंच शब्दोऽनित्यः कृतकोऽवासामान्यवत्त्वे सति
अस्मदादिबाहिरिन्द्रियप्रत्यक्षत्वात् घटवदित्यनुमानेन शब्दानां कृ
तकत्वेन पौरुषेयत्वासिद्धिः न च मीमांसकं प्रति योगिव्यवच्छेदा
मस्मदादिपदं व्यर्थमिति योगिनामनभ्युपगमादिति वाच्यं स्वम

प्र॰कृ॰
११९

नैव्यभिचारनिवारणार्थत्वात्॰ तथाचचिरंतनाचार्याणामपिस्वमते प्रदीपि॰
व्यभिचारनिवारणार्थविशेषणोपादानंदृश्यते॰ नित्यःशब्दोधति
धर्मितावच्छेदसति श्रावणत्वात्शब्दत्ववदिति नहिवर्णानित्यत्ववा
दिमतेवर्णातिरिक्ताधर्मयउदात्तादयोधर्माःसंतियेस्यावर्त्तेरन्
स्वमतेनधनित्वधर्माणांवोदात्तादीनांसद्भावाउपपद्यतेध्वनितधर्मत्व
त्वेसतीतिविशेषणं नचोपात्त्यादिशब्दभागासिद्धिः श्रोत्रग्राह्य
शब्दविशेषस्यैवपक्षीकरणात् नचैवमपिविशिष्टधर्मिहेत्वोरसि
द्धिस्तत्रश्रोत्रैकस्यैवध्वनेर्समवायानंगीकारात् एकस्यशब्द
स्यवहनाभृत्यन्तत्वानुपपत्तेरितिवाच्यं॰ शब्दनित्यत्ववादिमतेध्वनेस्य
दोषस्यतुल्यत्वात् व्याघातकत्वेनजात्यन्तरत्वापत्तेः तथाहि॰

119

य न
भवदिंद्रियग्राह्यः शब्दः पक्षोऽस्मदिंद्रियग्राह्यत्वे वा नाद्यः प्रतिवादिनं प्रत्यसिद्धेः नद्वि
तीयः वादिनं प्रत्यसिद्धेः नतस्माल्लोकप्रसिद्धिसिद्धशब्दत्वजात्याधार एव शब्दोऽ
नित्यत्वसाधने पक्ष इति वाच्यं। एवमनित्यत्वसाधनेऽपीति न काश्चिद्दोषः न
च स एवायं गकार इति प्रत्यभिज्ञाप्रत्यक्षविरोधात् कालात्ययापदिष्टमऽ
नित्यत्वानुमानं प्रत्यभिज्ञायाः जातिविषयत्वेन व्यक्तिविषयत्वेन वा संदि
ग्धमात्या यावाधकत्वानुपपत्तेः ननु विवादाध्यासितः कालो वेदाध्ययनपू
र्वः कालत्वात् संप्रतीपन्नकालवदिति प्रत्यनुमानविरोध इति चेत् मैवं
विकल्पासहत्वात् तथाहि किं वेदग्रहणाय नात्मा कालः किं वा तदुत्पादोत्तरका
ल उत सर्वकालः पक्षीक्रियते पक्षत्रयेपि मीमांसकस्य धर्म्यसिद्धिः प्रथमेव प्रा
तिज्ञापदयोर्व्याघातो निरिष्यते कालिदासादिवाक्यपाठेऽप्येवमनुमानोत्थाऽ

वि

प्र॰ कु॰ नादृभासस्समानयोगक्षेमत्वाचानुमानस्य॰ नन्वशरीरस्येश्वरस्य वक्तृत्वादि प्रदीपि॰ प्र॰
५८॰ व्यक्तिरूपवर्णोच्चारणासंभवात्कथं तत्प्रणीतत्वं वेदस्येति चेन्न मैवं स्वभा
वतोऽशरीरस्यापि परमेश्वरस्य भक्तानुग्रहार्थं लीलाविग्रहग्रहणोपपत्तेः
120 तदेवं वेदे पौरुषेयत्वानुमानस्य निरस्तसमस्तदूषणत्वात्तथा वेदाः पौरुषे
या इति प्राप्ते अत्र समाधिरभिधीयते कृतीनामीश्वराज्ञत्वे केवलम्प्र
ति पुरुषकृते मानान्तरोपलब्धार्थैरवताकृतनमीयते किमिदं पौरुषेयत्वं ना
म यदि प्रकृतयः स्वतः प्रमाणत्वेनोदाहृताः किं पुरुषाधीनोत्पत्तिम
त्त्वं वेदानां पौरुषेयत्वं उत प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वं तत्राद्यो
गीक्रियते आकाशवन्नित्यत्वेन सर्वगतत्वेन च कालतो देशतश्च क्रमस्य
स्यातां वर्णानामनित्यो उच्चारणप्रतिपत्तिक्रमाविशिष्टानां पूर्वपूर्वक्रम

त्रस्मृतिनिमित्तत्वात्तत्स्मरणोत्तरक्रमवतां वेदवाक्यानां सांप्रतम
पि गुरुमुखाधीतानुवृत्तिमत्तया सर्गसमयेपिक्रत्यात तथात्वस्य प्रतिपादयि
तुमुचितत्वात् द्वितीयस्तु न प्रमाणांतरेणार्थमुपलभ्य तद्बोधकरणा
दाविरचितत्वात् इति श्रुतिभिः प्रतिपादितत्वात् न च गुरुमुखाधीतानुवृ
त्तिमत्त्वस्य वर्णान्यथानुपपत्त्यैव प्रमाणान्तरेणार्थमुपलभ्याविरचितत्वं
सिध्येत् इदानीमस्मदादिभिरुच्चार्यमाणऋग्वेदवाक्येषु मालतीमाधवा
दिवाक्येषु च व्यभिचारात् एतेन प्रमाणान्तरवाक्यस्य रचनान्यथानुप
पत्त्या मानान्तरोपलब्धार्थविरचितत्वकल्पनापि प्रत्युक्ता अस्मदादिभिरुच्चा
र्यमाणमत्वादिवाक्येषु व्यभिचारात् किंच यदि विरचितत्वान्यथानुपपत्ति
र्मानान्तरोपलब्धार्थरचनां कल्पयेत् तर्हि नैव ऋग्वेद एवाग्नेरजायत यजुर्वेदो

श्री

ग्र॰कृ॰ वायोः सामवेद आदित्यादिति वेदानामग्न्यादिभ्यो जन्मश्रवणात्तत्कर्तृकत प्रदीपि॰
१२१ येश्वरकर्तृकत्वनियमो न स्यात् । अ पत्तस्मा ज्ञात्सर्वहुत ऋचः सामानि ज
ज्ञिरे इत्यादिवाक्येभ्यो वेदानामीश्वरकर्तृकत्वाधिगमादा स्तां देवताप घि॰
121 रंतत्वाकारमितिकल्प्येत नहि विरूपस्वयंभुवा वाचा विरूपा नित्यया ह्यनादिनि
धना नित्या वागुत्सृष्टा स्वयंभुवेत्यादिप्रकृति स्मृतिश्रुतिभ्योपि वेदानां नित्यत्वाव
गमात्तस्माद्यज्ञादित्यादिवाक्यं संप्रदायप्रवर्तकत्वपरमिति कल्पनानप
कृतोपिदं ड वारिता नन्वेषामन्यपरत्वान्नैतेभ्यो नित्यत्वासिद्धिरिति चेत्
नैवं । देवताधिकरणन्यायेन प्रमाणान्तरप्राप्तिविरोधयोरसत्तोरन्यपरा
णामपि स्वार्थे प्रामाण्योपपत्तेः एतेन वाक्यत्वादिति पौरुषेयत्वानुमा
नमपि परास्तं पुरुषप्रणीतत्वमात्रे साध्ये सिद्धसाधनत्वात् प्रमाणान्तरे

णार्थमुपलभ्य विरचितत्वसाधनेव मालतीमाधवादिष्वनैकांतिकत्वात् तथा
प्रमाणत्वे सति वाक्यत्वादाप्तप्रणीतत्वानुमानेऽपि सिद्धसाधनता. आप्तेनो
च्चार्यमाणत्वमात्रस्याप्तप्रणीतत्वस्यापौरुषेयवादिभिरप्यभ्युपगमात् प्रमा
णांतरेणार्थमुपलभ्य विरचितत्वानुमानेन हेतोरन्यथासिद्धिः अस्म
दादिभिरुच्चार्यमाणेदानींतनवेदवाक्यानामिव सर्गकालीनानामपि
तेषामीश्वरेणोच्चार्यत्वमात्रेणापि प्रमाणवाक्यत्वोपपत्तौ प्रमाणान्तरा
धिगतार्थपूर्वकविरचितत्वस्यानुमानस्याप्रयोजकत्वात् तस्य च सर्वज्ञत्वाद
तीतकल्पान्तान्तर्गतवेदापरोक्ष्यसंभवात्. अविग्रहस्यापि तस्य भक्तानुकं
पितया लीलाविग्रहग्रहणेन तदुच्चारणोपपत्तेश्च. एतेन सर्गकालीनाध्य
यनस्य पूर्वपूर्ववेदाध्ययनपुरःसरत्वमपि समर्थनीयमिति न चाश्रयासिद्धिः

प्र·कृ·
१२२
122

वेदांतिभिः सर्वांगीकारात्। न च भारताध्ययनस्य तद्ध्यायित्वप्रसंगेना(भा)ऽऽसमानयो प्रदीपि-
गलेभनानात्वं दृष्टत्वेन कर्तृस्मरणेन वा बाधात् न चैवमपि कर्तृस्मरणस्याबाधः
तस्याः संप्रदायप्रवर्तकत्वपरतयाप्युपपत्तेः अन्यथानित्यत्वप्रतिपाद
कवाक्यानामतत्त्वकारित्वप्रसंगात्। भारतस्यानित्यत्वप्रतिपादकप्रमाणा
भावाच्च। न च वेदानामनाप्तप्रणीतत्वादाप्तप्रणीतत्वमनुमानमुक्तमा
काशादौ व्यभिचारात् अप्यशब्दत्वे सतीति विशेषणाद्दोषः
नैवं आप्तप्रणीतत्वाभावस्य पूर्वोक्तन्यायेन वेदेप्यंगीकारात्। न च वे
दसातिपाषंडाद्यागमानामपौरुषेयत्वं मानांतरेणाप्युपलभ्यते
तत्पुरुषविरचितत्वस्य सौगतादिभिः स्वयमेवांगीकारात्। प्रसिद्धं च।
न च सामान्यवत्त्वे सत्यस्मदादिबहिरिंद्रियप्रत्यक्षतया वर्णानां कृतकत्वात्

मानमस्मदादिबहिरिंद्रियप्रत्यक्षत्वस्यकालाकाशादेर्नित्यत्वेनमाहं प्रत्य
नैकांतात्सत्प्रतिपक्षत्वाच्च॰ श्रोत्रंनित्यद्रव्यग्राहकंनिरवयवेंद्रियत्वान्म
नोवदितिअहमतेनप्रयोगसंभवात्॰ नचश्रोत्रेणानित्यद्रव्यग्राहकंश्र
नित्यरूपत्वविशेषगुणग्राहकंवाबहिरिंद्रियत्वात्तदाचक्षुर्वदितिप्रत्यनु
मानबाधः प्रप्यमानमानुनयतस्यनित्यगगनादिग्राहकत्वेनदृष्टांत
स्यसाध्यवैकल्यात्॰ द्वितीयेनरूपनिग्राहकत्वयासिद्धसाधनत्वात्॰ व्य
क्तिभेदासिद्धेश्चसएवायंगकारइतिप्रत्यभिज्ञायांजातेर्विषयत्वकल्पनात्
पपत्तेः ——— ध्वन्यानित्यत्वानुमानेदुर्वारः नचद्रुतोगकारोविलंबितो
गकारइतिविरुद्धधर्मसंसर्गात्वाद्गकारव्यक्तिभेदा ——— स्यांःप्रतीते
र्ध्वनिविषयत्वयावर्णविषयत्वाभावेनप्रामाणिकविरुद्धधर्मसंसर्गस्यासिद्धेः

प्र·कृ· प्रातीतिकस्यचतस्यभारि कूपार द्विविधानन्तस्यभेदसाधकत्वात्· वेदांतवादि प्रदीपि·
१२३ भिःसर्गस्यतादिप्रोक्षितकालस्यचांगीकारात्· अतीतकालशब्देनतत्र नौ
कारेणानुमानप्रवृत्तावपिनाधर्म्यसिद्धिः नचाभाससमानयोगक्षेमता
123 भासत्वाध्ययनानामनादित्वातिरसिनउरक्ताग्निरतत्वात् एवमपौरुष
यतयाविदानानामसंभावितापौरुषदोषसंसर्गेभ्यस्तेभ्योविगलितनिखि
लभेदविभुप्रब्रह्मप्रमितिरिसि नित्यसिद्धि १५ इतिश्रीमत्परमहंसपरिव्राज ध्व
काचार्यश्रीज्ञानोत्तमपूज्यपादशिष्यश्रीचित्सुखमुनिविरचितप्रत्यक्तत्व
प्रदीपिकायांप्रथमः परिछेदः १ ननुकथंविगलिताखिलभेदब्रह्मप्रति
पत्तिः प्रत्यक्षादिविरोधात् तथाहि प्रत्यक्षेणतावदिदमस्मात्भिन्नमि
तिनीलपीतादिभेदमध्यवस्यामः अप्यमत्ताकिप्रत्यक्षंभेदमेवगोचरयत्यत

वस्त्वपि यदि वस्त्वपि तदापि भेदपूर्वकं तज्ज्ञोचरे येत्तत्पूर्वकं वा -- युगपदेवोभयं वो
नाद्यः धर्मिप्रतियोगिवस्तुप्रतिपत्तिमन्तरेण भेदस्य प्रत्येतुमशक्यत्वादन्त ए
वनभेदग्रहपूर्वको वस्तुग्रहः नच वस्तुग्रहपुरःसरो भेदग्रहः बुद्धेर्विरम्यव्यापा
राभावात् नापि युगपदुभयग्रहः कार्यकारणबुद्ध्योर्योगपद्याभावात् ध
र्मिप्रतियोगिप्रतिपत्तौ हि भेदप्रतिपत्तेः कारणं संनिहितेपि धर्मिण्येव सांनि
हित्वप्रतियोगिप्रतिपत्तिमन्तरेण भेदप्रतिपत्तिव्यतिरेकस्य वादिप्रतिवा
दिनोः संमतत्वादिति मैवं स्वरूपभेदवादिनेप्रत्येतव्यं वा विकल्पानामनवसरदु
ष्यत्वात् वस्तुग्रहस्यैव भेदग्रहत्वात् नव वस्तुस्वभावस्यैव भेदत्वेन तद्ग्रहस्य प्र
तियोग्यनपेक्षत्वप्रसंगः वस्तुस्वभावतया भेदस्यानपेक्षत्वेपि तस्य सावि
कल्पकव्यवहारप्रतियोगिसापेक्षतोपपत्तेः दृश्यते हि प्रादेशमात्रपरिमाणस्य

प्र॰कु॰
१२४

स्यवस्तुनोऽनपेक्षत्वात्तद्वस्तुस्फुरणं दीर्घमिति सविकल्पके व्यवहारे तद्गताधिकप
रिमाणवस्तुग्रहणसापेक्षता नच धर्मभेदवादिनं प्रत्यप्येते विकल्पाः प्रसरमर्हं
ति युगपदुभयग्रहेऽपि विरोधाभावाद्सांनिहित्ये धर्मिणि प्रतियोगितिवा र
युगपदुभयग्रहाभावेऽपि सांनिहित्यस्थले तद्देवदत्त इति वद्पर्यायमेवोभय
ग्रहोपपत्तेः नच धर्मभेदवादे तस्य तत् — भेदस्य भेदान्तरभेद्यत्वादनवस्था
दोषापत्तिः मूलक्षतेरभावात् मूलक्षतिकरी प्राकृरनवस्था हि — णामिति
न्यायात् — धर्मपदेऽपि धर्मिणो भेदेन प्रतिपन्नस्य प्रतियोगित्वायां परस्प
राश्रयदोषः स्तम्भात्कुम्भस्य भेदासिद्धौ कुम्भात्स्तम्भस्य — सिद्धिरिति तत्र प्रति
पन्नभेदस्य तत्प्रतियोगित्वायां तद्व्यपरिहरः स्यात्मनोऽपि तत्प्रसंग इति चेन्न मैवं
विद्यमानभेदयोर — रूपेण स्फुरतो धर्मिप्रतियोगित्वोपपत्तेरेकस्मिन्भे

प्र॰दी॰पि॰

प॰

दग्रहप्रसंगाभावात् ननु क्षीरनीरयोर्विद्यमानभेदयोग — — वरूपग्रहणे
भेदग्रहो न दृश्यत इति चेत्त नैवं तत्र समानाभिहारलक्षणदोषप्रतिबंध:
देवतदग्रहोपपत्तेः एतेन दूरस्थल — स्थत्त्वोरपि भेदग्रहप्रसंगः प्रत्युक्तः
उक्तं चातिदूरात्सामीप्यादिंद्रियघाताऽन्मनोऽनवस्थानात् सौक्ष्म्याद्व
वधाने — — ॥ ॐ ॥ संवत् १९८० कार्तिक वदिप्र॰ ७ समाप्तम् शुभम्
लि॰ साधुराम लिखारी मुलाजम मंदिर श्री रघुनाथजी प्रस्तकालय जंबूस्थे

नं॰ १६०५ नं॰ ४

म॰ तं॰ २२५ प्रदीपि॰

125

इतिमन्त्रतत्त्वप्रदीपिकायां मूलंसमाप्तम् शुभम्